CHAMPURAMAYANA

BALAKANDA



SAMSKRITA SAHITYA SADANA

211 VISVESVARAPURAM, BANGALORE-4

Price Re 1-0-0

CHAMPURAMAYANA

BALAKANDA



SAMSKRITA SAHITYA SADANA

211 VISVESVARAPURAM, BANGALORE-4

Price Re 1-0-0

CHAMPURAMAYANA

BALAKANDA

WITH INTRODUCTION, NOTES, ETC.

BY

S. RANGACHAR, M. A.

PUBLISHED BY
R. SREENIVASACHAR
SAMSKRITA SAHITYA SADANA
(SANSKRIT LITERATURE SOCIETY)
211, Visvesvarapuram — 386, Cheluvamba Agrahar
BANGALORE—4 — MYSORE

BALAKANDA

WITH INTRODUCTION, NOTES, ETC.

BY

S. RANGACHAR, M. A.

PUBLISHED BY
R. SREENIVASACHAR
SAMSKRITA SAHITYA SADANA
(SANSKRIT LITERATURE SOCIETY)
211, VISVESVARAPURAM BANGALORE—4
386, CHELUVAMBA AGRAHAR MYSORE

1954

—: PRINTERS :—

1. SAMSKRITA SAHITYA SADANA, MYSORE

2. K. V. V. PRESS, MYSORE

INTRODUCTION

Preliminary — A literary composition is generally termed Kāvya in Sanskrit. This Kāvya is of two kinds— 1. Dṛs'ya and 2. S'ravya. Under Dṛs'ya we have the Drama and such other 'see-able' literary writings, while under S'ravya, we have 1. The Prose 2. Poetry and 3. A Mixed variety of prose and poetry called the Campū. This last species is expected to provide full scope for the poet to show his talents.

Champu — The *proso-poetic* form of composition must have earned recognition by about the beginning of the Christian era, as we find in the Purāṇas[1] verse coming amidst prose, although no Campū work bearing a date earlier than 10 th cent. A.D. has been available in classical literature. There can also be no doubt that the Campū species had become quite popular earlier than the 6th cent. A. D., for, Daṇḍin (6th cent.) refers to it in his Kāvyādars'a and offers the definition गद्यपद्यमयी चम्पूः . The earliest Campūs that are available, however, belong to the 10th cent. A.D. and they are (1) the Naḷacampū of Trivikrama (914-16 A D.) and (2) the Yas'astilaka of Somadeva (951 A.D.). There is another by name Jīvandharacampū by Haricandra, of uncertain date. This work has been assigned to the 6th cent. AD. by some scholars, on the ground that Bāṇa refers in his work to a writer of that very name ; but Prof. T.S. Kuppu-

---

1. Even in the Vedic Ākhyānas, this form of composition is found; cf. S'unahs'ephopākhyāna, otherwise known as Haris'candropākhyāna in the Aitareyabrāhmaṇa. Later than this, we find the same form of composition in the Buddhistic Jātakas and fables.

swamy Sastry holds that the work belongs to a date later than 900 A.D. It is true that a Haricandra is spoken of as a celebrated writer (of prose) by Bāṇa, but it is not possible to say that he is the same as the author of the Campū work in question.

A good many Campūs were written after the 10th cent. A.D. The chief of them are 1. Rāmāyaṇacampū of Bhoja (?), 2. Bhāratacampū of Ananta Bhaṭṭa (16th cent. A.D.), 3. Vis'vaguṇādars'a of Venkaṭādhvarin (17th cent. A.D.), 4. Nīlakaṇṭhavijaya of Nīlakaṇṭha Dīkṣita (17th cent. A.D.) a kinsman of Appayya Dīkṣita, and 5. Bhāgavatacampū. These five are considered generally to form the Pañcacampūs.

The Champu Ramayana—(Sometimes called Rāmāyaṇa Campū) is a proso-poetic composition narrating the story of Rāma as described in detail by Vālmiki in his Rāmāyaṇa. Many a time the very words of Vālmīki are used in the course of the work. Every Kāṇḍa begins with the same word as the one found at the commencement of the corresponding Kāṇḍa in the Rāmāyaṇa. The work is very popular. This popularity appears to be due to its being a very faithful narration of Vālmiki's version of the story of Rāma, in an elegant language.

The CampūRāmāyaṇa assigned to Bhoja is an incomplete work, as the author wrote up to the end of the Sundara-Kāṇḍa only. The subsequent (Yuddha) Kāṇḍa has been supplemented by Lakṣmaṇa [2], son of Gaṅgādhara and

2. The story of Yuddhakāṇḍa has been supplemented also by Rājacūdāmaṇidikṣit (see Adyār Sanskrit Mss.

Gaṅgāmbikā. He lived in a village named Sanagara, probably in the Circars. He is the author also of the Bhāratacampūtilaka.

The sequel to this work embracing the Uttara Kāṇḍa of the Rāmāyaṇa is called the Uttaracampū. Besides the one noticed as XVI 8180 in the Descriptive Catalogue of the Saṁskṛt Mss. of the Mysore Oriental Library and printed in Mysore, there are other Uuttaracampūs by Yatirāja, by S'aṅkarācārya, by Hariharānanda, by Rāghavācharya, by Garalapuri Sastrin and by Venkatādhvarin.

The Campūrāmāyaṇa has been commented upon by Rāmacandra, Kāmes'vara, Nārāyaṇa, Mānaveda, Ghanas'yāma and an anonymous person.

The Author — The view that the CampūRāmāyaṇa is the work of Bhoja (of Dhārā) is probably wrong; for, the colophon of the work simply states that it is "Vidarbharāja viracita." The exact name of the author is not mentioned. But at the beginning of the Yuddhakāṇḍa, its author Lakṣmaṇa clearly states that the earlier Kāṇḍās were composed by Bhoja, [3] which we may accept as quite reliable, Then comes the question 'Who is this Bhoja?' He cannot be the

---

Catalogue II 22), by Ghanas'yāma — [D.C.] Descriptive Catalogue, Madras Oriental Mss. Library XXII 8615-16.) and by Ekāmbaranātha (E. Hultzsch's Reports, Madras 1905, III No 1681.)

3 *Cf*, चेतः स्निह्यति तत्र देशिकपदाम्भोजे च भोजे मम· 1. d, and भोजेन तेन रचितामपि पूरयिष्यन्नल्पीयसापि वचसा etc. 2 *ab*.; also Ghanas'yāma (Tanj. Palace Mss. Cat. VII 3149)—. अथ विदर्भदेशाधिपतिः कविवदान्यः स्वयं कविः भोजराजः पञ्चकाण्डीं...

same as the author of the Sarasvatikaṇṭhābharaṇa, S'ṛṅgāra-prakās'a etc. as the colophons of these works are not the same as that of the Campūrāmāyaṇa. Cf.

I (*a*) इति श्री महाराजाधिराज श्री भोजदेवविरचिते सरस्वतीकण्ठाभरणे...

(*b*) इति श्री महाराजाधिराज श्री भोजदेवविरचिते श्रृङ्गारप्रकाशे......।

II इति श्री विदर्भराजविरचिते चम्पूरामायणे......।

The Sarasvatikaṇṭhābharaṇa, S'ṛṅgāraprakās'a and other works are assigned to Bhoja of Dhāra, The city of Dhāra is in Mālva, while Vidarbha, of which the author of the Campūrāmāyaṇa was king, is Berar. There is also this geographical difficulty to accept the identity.

Life of Bhoja — Bhoja of Dhāra (to whom tradition assigns the Campūrāmāyaṇa) was the celebrated king of the Paramāra dynasty. He is known to have been a contemporary of king Anantha of Kās'mīr (1028–1089 A.D.). Bhoja had a very glorious reign between 1018and 1063 A.D. Abdul Fazl, in his Aini Akbari says that it was Bhoja who shifted his capital to Dhāra from Ujjaini.

Bhoja was a great warrior. He fought several battles with neighbouring kings as also with the forces of Muhammad of Ghazni. Besides this, he was a great patron of learning, being himself very learned. "A Mosque at Dhārā now occupies the site of the King's Samskṛt College, in a temple dedicated appropriately to Saraswatī, the goddess of Learning." "The great Bhojpur lake, a beautiful sheet of water to the south-east of Bhopal, covering an area of 350 sq. miles formed by masonic embankments closing the outlet in a circle of hills, was his noblest monument and continued to testify to the skill of his engineers until the 15th century,

when the dam was cut by order of a Mohamadan king and the water drained off. The bed of the lake is now a fertile plain intersected by the Indian Midland Railway."

There are a few works named Bhojaprabandha, which describe Bhoja as scholar, poet and patron of learning and give us an account of his life. The works are variously written by Ballāḷa, Merutuṅga, Rājavallabha, Vatsarāja, Subhaśīla, and Padmagupta. There is also an anonymous poem Bhojaprabandhasāra, besides Bhojacarita, and Bhojarājasaccarita—a play in two acts by Vedānta Vāgīśa Bhattācārya.

The following early life of Bhoja can be gathered from the Bhojaprabandha and Bhojarājāṅka, an One Act play, by Sundaravīrarāghava.[4] Bhoja was a minor when his father Sindhula died; and hence, his uncle Muñja ascended the throne. The young prince was very popular and had become proficient in all the *kalās*. Envious of this, Muñja consulted an astrologer regarding the future of Bhoja and to his dismay learnt that he would reign for 55 years[5]. Thereupon Muñja decided to have the prince murdered secretly in a jungle and entrusted a tributary of his, named Vatsarāja, with the task of carrying out his decision. But the latter took pity on the young prince and concealed him somewhere. He however informed the king that he had murdered Bhoja and in proof of that showed him a sword besmeared with blood.

4. See Triennial Cat. II 2413.
5. The astrologer's prediction was—

पञ्चाशत्पञ्चवर्षाणि सप्तमासा दिनत्रयम् ।
भोजराजेन भोक्तव्यः सगौडो दक्षिणापथः ॥

He also gave him a green leaf on which a s'loka[6] was written by Bhoja in his own handwriting, to point out that temporal fortunes were after all hollow. On reading it Muñja became full of remorse. Later, learning that Bhoja was alive, he vacated the throne in his favour and retired to the forest as an ascetic.

Several humorous stories about Bhoja's court-poets are related by Revaṇa Ārādhya (10th cent. A.D.) in his Kavisamayavilāsa.

Works of Bhoja—Many works on various branches of general and scientific literature such as grammar, philosophy, astronomy, medicine, law, architecture and trade are attributed to Bhoja. The following are a few of his popular works.

ORIGINAL WORKS— 1 सरस्वतीकण्ठाभरण; 2 शृङ्गारप्रकाश; 3 सङ्गीतप्रकाश; 4 आख्यायिकाशृङ्गारमञ्जरी; 5 चम्पूरामायणम्; 6 शिवदत्तस्तोत्रम् 7 विद्याविनोदः 8 चाणक्यनीतिसारः (?) 9 शालिहोत्रम् 10 तत्वप्रकाशः 11 युक्तिकल्पतरुः 12 सुभाषितानि (an Anthology)

COMMENTARIES.— 1 राजमार्ताण्डः 2 रघुवंशव्याख्या; 3 शिवतत्वरत्नकलिका 4 राजवार्तिक (सांख्य)



6 मान्धाता च महीपतिः कृतयुगालङ्कारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः ?
अन्ये चापि युधिष्ठिरप्रभृतयो याता दिवं भूपते
नैकेनापि समं गता वसुमती, नूनं त्वया यास्यते ॥

॥ श्रीः ॥

चम्पूरामायणे बालकाण्डम्

—*—

लक्ष्मीं तनोतु नितरामितरानपेक्षम्
अङ्घ्रिद्वयं निगमशाखिशिखाप्रवालम्।
हैरम्बमम्बुरुहडम्बरचौर्यनिघ्नं
विघ्नाद्रिभेदशतधारधुरंधरं नः ॥ १ ॥

उच्चैर्गतिर्जगति सिद्ध्यति धर्मतश्चेत्
तस्य प्रमा च वचनैः कृतकेतरैश्चेत्।
तेषां प्रकाशनदशा च महीसुरैश्चेत्
तानन्तरेण निपतेत्क्व नु मत्प्रणामः ? ॥ २ ॥

गद्यानुबन्धरसमिश्रितपद्यसूक्तिः
हृद्या हि वाद्यकलया कलितेव गीतिः।
तस्माद्दधातु कविमार्गजुषां सुखाय
चम्पूप्रबन्धरचनां रसना मदीया ॥ ३ ॥

वाल्मीकिगीतरघुपुंगवकीर्तिलेशैः
तृप्तिं करोमि कथमप्यधुना बुधानाम्।
गङ्गाजलैर्भुवि भगीरथयत्नलब्धैः
किं तर्पणं न विदधाति नरः पितॄणाम् ॥ ४ ॥

— कथारम्भः —

वाचं निशम्य भगवान्स तु नारदस्य
प्राचेतसः प्रवचसां प्रथमः कवीनाम्।
माध्यंदिनाय नियमाय महर्षिसेव्यां
पुण्यामवाप तमसां तमसां निहन्त्रीम् ॥ ५ ॥

तत्र कंचन क्रौञ्चमिथुनादेकं पञ्चशरविद्धमपि व्याधेनानुविद्धं निध्यायतो बद्धानुकम्पस्य भगवतो वाल्मीकेर्वदनारविन्दाच्छन्दोमयी काचिदेवं निःससार सरस्वती ॥

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ ६ ॥

तदनु समयोचितकृत्यं निर्वर्त्य स्वाश्रमं प्रति गतवति भगवति वाल्मीकौ

वाणीविलासमपरत्र कृतोपलम्भम्
अम्भोजभूरसहमान इवाविरासीत् ।
आभाति यत्कृतिरनेकविधप्रपञ्च-
व्याजेन्द्रजालविधिसाधकपिञ्छिकेव ॥ ७ ॥

ततः परमहर्षेण महर्षिणा विधिवदभ्यर्चितः परमेष्ठी मध्यलोकेऽपि स्ववृत्तं प्रकाशयितुं किल भवन्तमेवोपतिष्ठमानयानया भारत्या रामचरितं यथाश्रुतं व्याक्रियतामिति व्याहृत्यान्तरधात् ।

अथ सरसिजयोनेराज्ञया रामवृत्तं
करबदरसमानं प्रेक्ष्य दृष्ट्या प्रतीच्या ।
शुभमतनुत काव्यं स्वादु रामायणाख्यं
मधुमयफणितीनां मार्गदर्शी महर्षिः ॥ ८ ॥

एवं प्रबन्धं प्रयोक्तुं कः समर्थ इति चिन्तामुपगतवति सति भगवति वाल्मीकौ ।

उपागतौ मिलितपरस्परोपमौ
बहुश्रुतौ श्रुतिमधुरस्वरान्वितौ ।
विचक्षणौ विविधनरेन्द्रलक्षणौ
कुशीलवौ कुशलवनामधारिणौ ॥ ९ ॥

एतौ मुनिः परिगृह्य स्वां कृतिमपाठयत् । तौ पुनरितस्ततो गायमानौ दृष्ट्वा रामः प्रहृष्टमनाः स्वभवनमानीय भ्रातृभिः परिवृतो निजचरितं गातुमन्वयुङ्क्त । ततश्च

छन्दोमयीनां निलयस्य वाचामन्ते वसन्तौ मुनिपुंगवस्य ।
एतौ कुमारौ रघुवीरवृत्तं यथाक्रमं गातुमुपाक्रमेताम् ॥ १० ॥

पुनाम्नाम नरकात् त्रायते इति
पुत्रः

अस्ति प्रशस्ता जनलोचनानामानन्दसंदायिषु कोसलेषु ।
आज्ञाऽमुत्सारितदानवानां राज्ञामयोध्येति पुरी रघूणाम् ॥ ११ ॥

तामावसद्दशरथः सुरवन्दितेन
संक्रन्दनेन विहितासनसंविभागः ।
वृन्दारकारिविजये सुरलोकलब्ध-
मन्दारमाल्यमधुवासितवासभूमिः ॥ १२ ॥

अथास्मिन्ननपत्यतया दूयमानमानसे पुत्रार्थं क्रतुमश्वमेधं विधातुं मन्त्रिभिः समं मन्त्रयमाणे दशरथे सुमन्त्रः प्रहृष्टमना महर्षेरङ्गदेशसंगतावग्रहनिग्रहशौण्डस्य विभाण्डकसूनोरवश्यमृष्यशृङ्गस्य प्रसादात्प्रभवो भविता कुमाराणामिति सनत्कुमारोदीरितं पुरावृत्तमस्मै दशरथाय कथयामास ।

[सोऽपि सुमन्त्रवचनाच्छान्ताधिः शान्ताकुटुम्बिनं संबन्धिनं मुनिमानीय वसिष्ठादिष्टमश्वमेधाध्वरं सरयूरोधसि विधाय तत्र पुत्रीयामिष्टिं विधिवत् कर्तुमारभत । तदनु हविराहरणाय धरणौ कृतावतरणाः सर्वे गीर्वाणगणाः शतमखप्रमुखाश्चतुर्मुखाय दशमुखप्रतापग्रीष्मोष्मसंप्लोषणमावेद्य तेन सह शरणमिति शार्ङ्गधन्वानं मन्वाना नानाविधप्रस्तुतस्तुतयः क्षीराम्बुराशिम् आसेदुः ।

संतापघ्नं सकलजगतां शार्ङ्गचापाभिरामं
लक्ष्मीविद्युल्लसितमतसीगुच्छसच्छायकायम् ।
वैकुण्ठाख्यं मुनिजनमनश्चातकानां शरण्यं
कारुण्यार्द्रं त्रिदशपरिषत्कालमेघं ददर्श ॥ १३ ॥

क्षीराम्भोधेर्जठरमभितो देहभासां प्ररोहैः
कालोन्मीलत्कुवलयदलद्वैतमापादयन्तम् ।
आतन्वानं भुजगशयने कामपि क्षौमगौरे
निद्रामुद्रां निखिलजगतीरक्षणे जागरूकाम् ॥ १४ ॥

प्रह्लादस्य व्यसनममितं दैत्यवर्गस्य दम्भं
स्तम्भं वक्षःस्थलमपि रिपोर्यौगपद्येन भेत्तुम् ।
बद्धश्रद्धं पुरुषवपुषा मिश्रिते विश्वदृष्टे
दंष्ट्रारोचिर्विशदभुवने रंहसा सिंहवेषे ॥ १५ ॥

नारायणाय नलिनायतलोचनाय
नामावशेषितमहाबलिवैभवाय ।
नानाचराचरविधायकजन्मदेश-
नाभीपुटाय पुरुषाय नमः परस्मै ॥ १६ ॥

इति प्रणम्योत्थितानेतान् स्तुतिरवमुखरितहरिन्मुखान्हरिहयप्रमुखान् अखिलानमरानरुणारुणतामरसविलासचोरैः लोचनमरीचिसंतानैरानन्दयन् अरविन्दलोचनः स्फुटमभाषत ।

अपि कुशलममर्त्याः ? स्वागतं सांप्रतं वः,
शमितदनुजदम्भा किं नु दम्भोलिकेलिः ?
अपि धिषणमनीषानिर्मिता नीतिमार्गा-
स्त्रिदशनगरयोगक्षेमकृत्ये क्षमन्ते ? ॥ १७ ॥

एवं भगवतः कुशलानुयोगपुरःसरीममृतासारसरसां सरस्वतीमाकर्ण्य संपूर्णमनोरथानां सुमनसां संसत्पुंसे परस्मै विज्ञापयामास । देव, कथम् अकुशलमाविर्भवेद्भवता कृतावलम्बानामस्माकम् ? किंतु ।

अस्ति प्रशस्तविभवैर्विबुधैरलङ्घ्या
लङ्केति नाम रजनीचरराजधानी ।
माणिक्यमन्दिरभुवां महसां प्ररोहैः
तेजस्त्रयाय दिनदीपदशां दिशन्ती ॥ १८ ॥

एनां पुराणनगरीं नगरीतिसालां
सालाभिरामभुजनिर्जितयक्षराजः ।
हेलाभिभूतजगतां रजनीचराणां
राजा चिरादवति रावणनामधेयः । १९ ॥

यद्बाहुराहुरसनायितशस्त्रधारा
दिक्पालकीर्तिमयचन्द्रमसं ग्रसन्ति ।
यद्वैरिणां रणमुखे शरणप्रदायी
नैवास्ति कश्चिदमुमन्तकमन्तरेण ॥ २० ॥

अम्भोजसंभवममुं बहुभिस्तपोभिः
आराधयन्वरमवाप परैर्दुरापम् ।
तस्मादशेषभुवनं निजशासनस्य
लक्षीकरोति रजनीचरचक्रवर्ती ॥ २१ ॥

तेन वयं पराधीना इव भवामः । तथा हि । सोऽयं कदाचित्क्रीडाधराधरमारुह्य सावरोधवधूजनश्चरणाभ्यां संचरेत चेदागमिष्यत्याग इत्यनाविष्कृतातपो भयेन भगवान्सहस्रभानुरपि संकुचितभानुरेव तत्सानूनि नूनं संश्रयते । एष मृगाङ्कोऽपि मृगयायासपरिश्रांतिविश्रान्त्यै ससंभ्रमं नमज्जनपरिवृते मज्जनगृहाभिमुखे दशमुखे तत्रत्यविचित्रतरशातकुम्भस्तम्भाग्रप्रत्यग्रप्रत्युप्तस्फटिकशिलाशालभञ्जिकापुञ्जकरतलकलितनिजोपलमयकलशमुखाच्छाच्छामविच्छिन्नधारामम्बुधारां निजकराभिमर्शादापादयन् तस्य प्रसादपिशुनानां शुनासीरचिरकाङ्क्षितानां विंशतिविधवीक्षणानां क्षणमात्रं पात्रं भवति । तेन पुलस्त्यनन्दनेन संक्रन्दननन्दनात्स्वमन्दिरोद्यानमानीतस्य मन्दारप्रमुखस्य वृन्दारकतरुवृन्दस्य बन्दीकृतसुरसुन्दरीनयनेन्दीवरद्वन्द्वाच्च करारविन्दकलितकनककलशाच्च मन्दोष्णं स्यन्दमानैरम्बुभिर्जम्बालितालवालस्य पचेलिमानामपि कुसुमानां पतनभयमाशङ्कमानाः पवमानाः परिस्पन्दितुमपि प्रभवो न भवन्ति । एतेऽपि पावका हृदिशङ्कावहां हुतवहाख्यां वहन्तस्तद्गृहे गार्हपत्यपुरोगाः पौरोगवधुरं दधते । किं बहुना । स एष मानुषादवमाननमागमिष्यतीत्यमन्वानस्तदितैरवध्यत्वं चतुराननवराल्लब्ध्वा समुद्धतः संप्रति संप्रहारसमाक्रान्तदिगन्तदन्तावलदन्तकुन्त-

व्रणकिणसंपुटितवक्षःस्थलः स्थलकमलिनीं वनवार इव रावणस्त्रिलोकीमभिभवन्भवदीयानित्यस्मान्न जातु किंचिदपि जानातीति । अथ भगवानाकर्ण्य गीर्वाणगणवाणीम् —

इन्द्रनीलाचलोदञ्चच्चन्द्रिकाधवलस्मितः ।
वाचमूचे सुधाधारां मधुरां मधुसूदनः ॥ २२ ॥

भवतामपराधविधायिनस्तस्य यातुधानस्य निधनमधुनैव विधातुं शक्यम् । किंतु सरसिजासनशासनमप्यमोघीकुर्वन्नुर्वीतले पुत्रीयतः सुत्राममित्रस्य दशरथस्य मनोरथमपि पूरयितुमादृतमानुषवेषः सन्नहमेव तं हनिष्यामीति व्याहृत्यान्तरधात् । ततः सा परिषदनिमिषाणामुन्मिषितहर्षा हृषीकेशादेशात्प्रशमितदुर्दशानि निर्दशाननानि चतुर्दशभुवनानि बुद्ध्वा दुग्धसागरान्निरगात् । ततस्तानमरान्प्राह स पितामहः । भवन्तस्तावदवतरिष्यतो लक्ष्मीसहायस्य साहाय्यार्थमप्सरःप्रभृतिषु युवतिषु वानराच्छभल्लगोपुच्छनीलमुखवेषभृतः प्रथितप्रभावाः प्रजाः प्रजनयेयुरिति । पुरैव किल मम जृम्भारम्भे संभूतवाञ्जाम्बवानिति । ततस्ते गीर्वाणास्तथाकुर्वन् । अथ वैतानाद्वैश्वानरान्नरः प्राजापत्यः सहेमपात्रः कश्चिदुत्थाय पुत्रीयते दशरथाय पायसममृतप्रायं प्रायच्छत् । ततः —

कौसल्यायै प्रथममदिशद्भूपतिः पायसार्धं
प्रादादर्धं प्रणयमधुरं केकयेन्द्रस्य पुत्र्यै ।
एते देव्यौ तरलमनसः पत्युरालोच्य भावं
स्वार्धांशाभ्यां स्वयमकुरुतां पूर्णकामां सुमित्राम् ॥ २३ ॥

अवभृथेऽवसिते सरयूतटादथ यथायथमुच्चलिते जने ।
दशरथः परिपूर्णमनोरथः पुरमगात्पुरुहूतपुरोपमाम् ॥ २४ ॥

अपाटवात्केवलमङ्ककानां मनोज्ञकान्तेर्महिषीजनस्य ।
शनैः शनैः प्रोज्झितभूषणानि चकाशिरे दौहृदलक्षणानि ॥ २५ ॥

मन्दमन्दमपयद्वलित्रया गाधतादिपयनाभिगह्वरा ।
कोसलेन्द्रदुहितुः शनैरभून्मध्ययष्टिरपि दृष्टिगोचरा ॥ २६ ॥

न्यग्रोधपत्रसमतां क्रमशः प्रयाताम्
अङ्गीचकार पुनरप्युदरं कृशाङ्ग्याः ।
जीवातवे दशमुखारगपीडितानां
गर्भच्छलेन वसता प्रथमेन पुंसा ॥ २७ ॥ अपि च

मध्यं तनुत्वादविभाव्यमानमाकाशमासीदसितायताक्ष्याः ।
गर्भोदये विष्णुपदापदेशात्कार्श्यं विहायापि विहाय एव ॥ २८ ॥

ततः— उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ
लग्ने कर्कटके पुनर्वसुयुते मेषं गते पूषणि ।
निर्दग्धुं निखिलाः पलाशसमिधो मेध्यादयोध्यारणेः
आविर्भूतमभूतपूर्वमपरं यत्किंचिदेकं महः ॥ २९ ॥

अपिच— अथ राममभिधानेन कवेः सुरभयन्गिरः ।
अलंचकार कारुण्याद्रघूणामन्वयं हरिः ॥ ३० ॥

तमेनमन्वजायन्त त्रयस्त्रेताग्नितेजसः ।
अग्रजस्यानुकुर्वन्तस्तैस्तैर्लोकोत्तरैर्गुणैः ॥ ३१ ॥

भरतस्तेषु कैकेय्यास्तनयो विनयोज्ज्वलः ।
अन्यौ लक्ष्मणशत्रुघ्नौ सुमित्रायां कृतोदयौ ॥ ३२ ॥

एते ववृधिरे वीरा ब्रह्मक्षेमाय दीक्षिताः ।
लोकानन्दमुकुन्दस्य चत्वार इव बाहवः ॥ ३३ ॥

अथ कदाचिदपरिमेयमायाभयानकयुद्धसमुद्धतदैत्यबलावस्कन्दकांदिशीकवृन्दारकानीकपरिवार्यमाणरथः पंक्तिरथस्तपश्चर्याजातानामाश्चार्याणामायतनं त्रिशङ्कुयाजिनं भगवन्तं पद्यप्रबन्धमिव दर्शितसर्गभेदं प्राकृतव्याकरणमिव प्रकटितवर्णव्यत्यासं बुधमिव सोमसुतं कुशिकसुतमद्राक्षीत् तदनु यथाविधिकृतसपर्येण मर्यादातीतमहिम्ना महितेन गाधेतरहृदयेन

boundary. deep.

गाधिनन्दनेन सत्रपरित्राणार्थमित्थमभ्यर्थितोऽभूत् । राजन्, भवतस्तनयेन विनयाभिरामेण रामेण शरासनमित्रेण सौमित्रिमात्रपरिजनेन क्रियमाणक्रतुरक्षो रक्षोदुरितमुत्तीर्य कृतावभृथो भवितुमभिलषामीति । एतदाकर्ण्य कर्णपरुषं महर्षिभाषितमतिमात्रपुत्रवात्सल्यात्कौसल्याजानिः सशल्यान्तःकरणोऽभूत् । ततस्तस्मिन्बहुप्रकारैरवार्यनिश्चये भगवति विश्वामित्रे दशरथस्तपनकुलहितेन पुरोहितेनैवमभिहितोऽभूत् ।

"पर्याप्तभाग्याय भवानमुष्मै कुर्यात्सपर्यां कुशिकात्मजाय ।
निर्यातुधानां वसुधां विधातुं निर्यातु रामः सह लक्ष्मणेन" ॥ ३४ ॥

एवं वसिष्ठेन प्रतिष्ठापितधृतिर्दशरथः सुतप्रदानेन कुशिकसुतमनोरथमेव पूरयामास ।

योगेन लभ्यो यः पुंसां संसारापेतचेतसाम् ।
नियोगेन पितुः सोऽयं रामः कौशिकमन्वगात् ॥ ३५ ॥

तत्र सत्रं परित्रातुं विश्वामित्रो महामुनिः ।
सौमित्रिसहितं रामं नयन्नयमवोचत ॥ ३६ ॥

बलेन तपसां लब्धे बलेत्यतिबलेति च ।
विद्येते मयि काकुत्स्थ विद्ये ते वितरामि ते ॥ ३७ ॥

ततो गृहीतविद्यस्य दाशरथेः प्रदेशमेकं प्रदर्श्य भगवानित्थमकथयत् ।

अस्मिन्पुरा पुरभिदः परमेश्वरस्य
भालान्तरालनयनज्वलने मनोभूः ।
सद्यः प्रपद्य शलभत्वममुञ्चदङ्गं
तस्मादमुं जनपदं विदुरङ्गसंज्ञम् ॥ ३८ ॥

तदनु मानससरःप्रसृतां सरयूमतिक्रम्य वृत्रवधप्रवृद्धवृद्धश्रवःपङ्कक्षालनलब्धमलमलदकरूशनाम्नोर्जनपदयोः सीम्नि कृतपदयोर्दाशरथ्योः पुनरप्येवमब्रवीत् ।

यक्षः सुकेतुर्द्रुहिणप्रसादाल्लेभे सुतां कामपि ताटकाख्याम् ।
सुन्दः किलैनां परिणीय तस्यां मारीचनीचं जनयांबभूव ॥ ३९ ॥

एकदा सुन्दे निहते मारीचः कुम्भसंभवमभिभूय तस्य शापादवाप कौणपताम् । ताटकाप्यभूत्पुरुषादिनी । सेयमब्जासनसिद्धसिन्धुरसहस्रप्राणात्मजेन सह जनपदविपदं विदधाना व्यापादनीया त्वयेति । रामस्तमाकर्ण्य स्त्रीवधशङ्कामकरोत् । किंच । वैरोचनीं मन्थरां वसुंधरापराधधुरंधरां पुरंदरेण निहतां जनार्दनकृतमर्दनां च भार्गवजननीं प्रदर्श्य दाशरथेरमन्दां सुन्दवधूवधविचिकित्सामुत्सारयामास ।

आश्रुतः श्रुतवृत्तेन तेन सुन्दप्रियावधः ।
तमेवान्ववदत्तस्य चापः शिञ्जारवच्छलात् ॥ ४० ॥

तत्काले पिशिताशनाशपिशुना संध्येव काचिन्मुनेः
अध्वानं तरसा रुरोध रुधिरक्षोदारुणा दारुणा ।
स्वाधीने हनने पुरीं विदधती मृत्योः स्वकृत्यात्यय-
क्रोडत्किंकरसंघसंकटमहाशृङ्गाटकां ताटका ॥ ४१ ॥

अथ दाशरथेः कर्णमविशत्ताटकागुणाः ।
तथा धनुर्गुणस्तूर्णं प्राविशत्तज्जिघांसया ॥ ४२ ॥

ततो भाविनि संग्रामे बद्धश्रद्धस्य ताटका ।
स्वप्राणान्रामबाणस्य वीरपाणमकल्पयत् ॥ ४३ ॥

मुनिर्भृशाश्वोपज्ञानि ताटकामाथिने ददौ ।
अस्त्राणि जृम्भकादीनि जम्भशासनशासनात् ॥ ४४ ॥

प्रतिदिनमवदातैर्ब्रह्मभिर्ब्रह्मनिष्ठैः
प्रशमितभवखेदैः सादरं सेव्यमाने ।
बलिनियमनहेतोर्वामनः काननेऽस्मिन्
बलिनियमपरः सन्ब्रह्मचारी चचार ॥ ४५ ॥

अपहृतविबुधार्तेर्वामनस्याजमूर्तेः
अखिलभुवनभिक्षाराश्रमानोकहानाम् ।
ततिरियमतिनीला व्याप्तदिग्व्योमसीमा
स्वयमपि परिमातुं लोकमभ्युद्यतेव ॥ ४६ ॥

इति विविधरसाभिः कौशिकव्याहृताभिः
श्रुतिपथमधुराभिः पावनीभिः कथाभिः ।
गलितगहनकृच्छ्रं गच्छतोर्दाशरथ्योः
समकुचदिव सद्यस्तादृशं मार्गदैर्घ्यम् ॥ ४७ ॥

ततः सिद्धाश्रमं प्रविश्य विश्वामित्रः सत्रमारभत । तदनन्तरमन्तरिक्षान्तरालादापतन्तमन्तकानीकभयानकं तं पलाशगणमवलोक्य पलायमानाः करगलितसमित्कुशाः कुशिकनन्दनान्तेवासिनः ससंभ्रममभिलषिताहवाय राघवाय न्यवेदयन् ।

हृत्वाद्रेः शिखराणि तानि परितः क्षिप्त्वा हसित्वा क्रुधा
कृत्वा हस्तविघट्टनं तत इतः स्थित्वा नदित्वा मुहुः ।
सिक्त्वा क्ष्मामसृजा स्रजान्त्रकृतया बद्ध्वा कचान्खेचरान्
दग्ध्वाग्नेः सदृशा दृशा निशिचरा रुन्धन्ति रन्ध्रं दिवः ॥ ४८ ॥

तत्र । संक्रान्तवर्णान्तरगाधिसूनोः संपर्कपुण्यादिव रामभद्रः ।
क्षात्रक्रमात्पिप्पलदण्डयोग्यः पलाशदण्डाहतपाणिरासीत् ॥

मारीचनीचमतिराहवमारचय्य
क्षिप्तः क्षणेन रघुनायकसायकेन ।
मध्येपयोनिधि भयेन निमग्नमूर्तिः
वेषं पुपोष जलमानुषनिर्विशेषम् ॥ ५० ॥

सुबाहुराहवोन्मत्तः कृत्तः काकुत्स्थपत्रिणा ।
मुनीनामनभिप्रेतः प्रेतनाथातिथिः कृतः ॥ ५१ ॥

वंशस्पृशा हृदयहारिफलान्वितेन
रामेरितेन सहसा सहसायकेन ।
स्नेहार्दितेन निरगादनुरागिणीव
प्राणावलिर्हृदयतः पिशिताशनानाम् ॥ ५२ ॥

अथ निशिचरमाथाद्वीतवैतानविघ्नो
मुनिरवभृथकृत्यं विश्वहृद्यं समाप्य ।
अमनुत जयलक्ष्म्या राममाजौ समेतं
यजनजनितमूर्त्या योक्तुमव्याजलक्ष्म्या ॥ ५३ ॥

अथ मिथिलां प्रति प्रस्थितः कौशिकः काकुत्स्थमित्थमकथयत् । पुरा खलु कुशेशयासनजन्मा कुशाभिधानो राजर्षिः कुशाम्बप्रमुखैश्चतुर्भिः कौशाम्बीमहोदय–धर्मारण्य–गिरिव्रजाख्यानां पुरीणां कर्तृभिः पुत्री बभूव । कुशनाभस्तु घृताच्यां कन्याशतमजनयत् । कन्यास्ताः संनद्धयौवनाः कामयमानः पवमानः प्रत्याख्यानात्प्रत्यापन्नमन्युरासामवयवेष्वनार्जवमतनुत । अथ विदितवृत्तान्तेन कुशनाभेन तेन क्षमामेव प्रतिक्रियां मन्यमानेन चूलिसूनवे सौमदेवाय राज्ञे ब्रह्मदत्ताय दत्तास्ताः प्रकृतिस्था बभूवुः । पुनरपि कुशनाभस्तु पुत्रीयन्पितुः प्रसादादगाधसत्त्वान्गाधिसंज्ञानसत्तातपादानुदपादयत् । इत्थं दाशरथिः कौशिकोत्पत्तिकथानिशमननिरायामयामिनीयामानुबन्धो बन्धूकस्तबकसुन्दरबन्धुरेण संध्यारागेण प्राचीमुखेन शोणीकृतेन शोणाभिधानं दधानेन नदेन प्रवर्तितप्रत्यूषकृत्यः कृतनियमेन मुनिना सह गङ्गामुपतिष्ठमानेन पथा प्रातिष्ठत ।

आजानपावनक्षीरां वृषानन्दविधायिनीम् ।
श्रुतिप्रणयिनीं सोऽयमापगामाप गामिव ॥ ५४ ॥

अथ भागीरथीकथां श्रोतुकामाय रामाय भगवानिदमभाषत ।

पुरा मनोरमा नाम सुमेरोरभवत्सुता ।
गृहमेधी तयैवासीच्चक्रवर्ती धराभृताम् ॥ ५५ ॥
कन्याद्वयममुष्यासीदेका मन्दाकिनी तयोः ।
अन्या भगवती साक्षाच्चन्द्रचूडकुटुम्बिनी ॥ ५६ ॥
तां नदीं विबुधा लब्ध्वा नाकलोकमनीनयन् ।
तपस्यन्तीं गिरिर्गौरीं देवाय महते ददौ ॥ ५७ ॥
शिवयोर्युञ्जतोर्वीर्यं दृष्ट्वा धात्र्यां समर्पितम् ।
पावकः प्रतिजग्राह दैवतैरनुनाथितः ॥ ५८ ॥
अनपत्यानथामर्त्यान्बहुभार्यां च मेदिनीम् ।
अकरोदम्बिकाक्रोधः पुत्रालाभसमुद्भवः ॥ ५९ ॥
अथ सेनान्यमिच्छद्भिरुक्तः सब्रह्मभिः सुरैः ।
वह्निरह्नाय जाह्नव्यां न्यषिञ्चद्वीर्यमैश्वरम् ॥ ६० ॥
सापि सप्तार्चिषा क्षिप्तं तेजस्तद्वोढुमक्षमा ।
हिमवत्प्रान्तकान्तारे श्रान्ता शरवणे जहौ ॥ ६१ ॥
तत्राभूत्कृत्तिकाप्रीत्यै षोढारूढमुखाम्बुजम् ।
तारकध्वान्तविध्वंसि सद्यः षाण्मातुरं महः ॥ ६२ ॥
त्रैविध्यं श्रूयतां वत्स सरितस्त्रिदिवौकसाम् ।
यथोक्तं हव्यमश्नन्त्या देवताया इवाध्वरे ॥ ६३ ॥
पुरीमयोध्यामध्यास्त सावित्रः सगरो नृपः ।
केशिनीसुमतिभ्यां च लङ्घितप्रथमाश्रमः ॥ ६४ ॥
स पुत्रीयन्सपत्नीकस्तपस्तेपे समाः शतम् ।
भृगुः प्रीतमनास्तस्मै ददौ दायादसंपदम् ॥ ६५ ॥
असमञ्जं सुतं लेभे वैदर्भी केशिनी तयोः ।
षष्टिं पुत्रसहस्राणां सुमतिश्च यवीयसी ॥ ६६ ॥
असमञ्जसचारित्रमसमञ्जमपोह्य सः ।
आरब्धहयमेधः सन्नमुञ्चत तुरंगमम् ॥ ६७ ॥

Indeclinable.
past participle

क्रव्यादवपुषा सोऽयमहारि हरिणा हयः ।
ततस्तं नष्टमन्वेष्टुं सौमतेयाः प्रतस्थिरे ॥ ६८ ॥
सर्वे सपर्वतामुर्वीं खनन्तः सगरात्मजाः ।
चक्रुर्झर्झरितध्वान्तं नागलोकं नखांशुभिः ॥ ६९ ॥
त एते तपसा दीप्ते तमःस्तोमप्रमाथिनि ।
कापिले ज्वलने वीरा लेभिरे शलभोपमाम् ॥ ७० ॥
असमञ्जसुतं पौत्रमंशुमन्तमथाब्रवीत् ।
सप्तिं हृत्वा समाधत्तां सप्ततन्तुं भवानिति ॥ ७१ ॥
सोऽपि गत्वा बिलं तत्र दृष्ट्वा भस्मीकृतान्पितॄन् ।
साश्रुस्तेभ्योऽञ्जलिं दित्सुश्चिरंलेभे तुरंगमम् ॥ ७२ ॥
मातुलो गरुडस्तेषामेनं तत्रैवमब्रवीत् ।
गङ्गामिहानयायुष्मन्नेषामेषा गतिः परा ॥ ७३ ॥
ततस्तनयवृत्तान्तं श्रुत्वा लब्धतुरंगमः ।
समाप्य सगरः सत्रं पुत्रशोकाद्दिवं गतः ॥ ७४ ॥
अथांशुमानयं राज्यं चिराय परिपालयन् ।
दिलीपे न्यस्तभूभारस्तपस्तेपे हिमालये ॥ ७५ ॥
दिलीपेऽपि दिवं याते श्रुत्वा वृत्तं भगीरथः ।
अमर्त्यसरितं कर्तुं मेने मर्त्यतरंगिणीम् ॥ ७६ ॥
ततो गोकर्णमासाद्य तपस्यति भगीरथे ।
देवो देवापगां वोढुमन्वमंस्त दयानिधिः ॥ ७७ ॥
अथ वीचीजयच्छन्नदिगन्तगगनान्तरा ।
शशाङ्कशङ्खसंभिन्नतारामौक्तिकदन्तुरा ७८ ॥
तरंगाकृष्टमार्तण्डतुरंगायासितारुणा ।
फेनच्छन्नस्वमातङ्गमार्गणव्यग्रवासवा ॥ ७९ ॥
आविःशाखाशिखोन्नेयनन्दनद्रुमकर्षणा ।
एकोदकनभोमार्गदिङ्मूढदिवसेश्वरा ॥ ८० ॥

आवर्तगर्तसंभ्रान्तविमानप्लवविप्लवा ।
नीलजीमूतशैवालकृतरेखाहरित्तटा ॥ ८१ ॥
अवलेपभराक्रान्ता सुरलोकतरंगिणी ।
पपात पार्वतीकान्तजटाकान्तारगह्वरे ॥ ८२ ॥
अलब्धनिर्गमा शंभोः कपर्दादमरापगा ।
दधौ दूर्वाशिखालग्नतुषारकणिकोपमाम् ॥ ८३ ॥
अदृष्ट्वा तां नदीं तत्र तुष्टाव परमेश्वरम् ।
भगीरथो विधेः क्रौर्यात्परिक्षीणमनोरथः ॥ ८४ ॥
गङ्गा सप्ताकृतिर्जाता न्यपतद्धरमूर्धनि ।
तेन स्तुत्या प्रसन्नेन क्षिप्ता विन्दुसरस्यपि ॥ ८५ ॥
तासु प्राचीं गतास्तिस्रस्तिस्रः प्राचेतसीं दिशम् ।
अन्या पितृक्रियोद्युक्तभगीरथपथानुगा ॥ ८६ ॥
सैषा भागीरथी जह्नोः सत्रक्षेत्रं समावृणोत् ।
तां स पीत्वा ततः शान्तो जह्नौ श्रोत्रेण वर्त्मना ॥ ८७ ॥
तया तटिन्या जाह्नव्या प्रापयत् त्रिदिवं पितॄन् ।
भगीरथः पुरं प्राप परिपूर्णमनोरथः ॥ ८८ ॥

अथ दाशरथिराकर्णितभागीरथीकथस्तां सरितं विलङ्घ्य विशालां विलोक्य पुरीं कस्येयमिति गाधिनन्दनमपृच्छत् । सोऽप्येवमवोचत् । पुरा खलु सुरासुराणां सुधानिमित्तं मिथोविरोधे प्रवृत्ते मायां विश्वमोहिनीं विश्वरूपः प्रदर्श्य दैतेयनिधनं शतधारपाणिना कारयामास । तेषां जननी दितिरतिवेलमन्युः शतमन्युशासनं कमपि पुत्रं लब्धुकामा पत्युर्मारीचस्य वचनात्कुशप्लवे सुचिरं तपश्चचार । तां कैतवेन शुश्रूषमाणः शतधारपाणिः पादकलितकचकलापामापन्ननिद्रामपवित्रेति निर्वर्ण्यावगाहिततदीयजठरः सप्तधा गर्भं निर्भिद्य निर्जगाम । दितिरपि विदिततनयवृत्तान्ता

तान्यपि खण्डान्याखण्डलेन सप्तमरुतः कारयित्वा त्रिविष्टपं प्रविष्टा ।

अलम्बुसायामिक्ष्वाकोर्जातः कश्चिन्महीपतिः ।
विशालेति स्वनाम्नात्र विशालां विदधे पुरीम् ॥ ८९ ॥

तदनु तद्वास्तव्येन सुमतिनाम्ना नृपतिना कृतातिथ्यः सराजपुत्रो भगवान्विश्वामित्रस्तत्र निशीथिनीं नीत्वा मिथिलां प्रति प्रस्थितः प्रतपसामुत्तमस्य गौतमस्याश्रमं प्रदर्श्य तद्दारानुषक्तां कथामित्थमकथयत् ।

अत्रागमद्गौतमधर्मदाराननार्यजुष्टेन पथा महेन्द्रः ।
स च क्रुधा निर्वृषणं वृषाणं भार्यामदृश्यां च मुनिश्चकार ॥ ९० ॥

वनमेतद्गते रामे शापमुक्ता भविष्यसि ।
इत्युक्त्वा गौतमः पत्नीं हिमाद्रिं तपसे ययौ ॥ ९१ ॥
इत्थं विदितवृत्तान्ते देवतानां गणे तदा ।
पितॄणां प्राभवाल्लेभे मेषस्य वृषणं वृषा ॥ ९२ ॥
तदेनामेनसो मुक्तां प्रतिगृह्णातु गौतमः ।
इति तस्याश्रमं भेजे साकं रामेण कौशिकः ॥ ९३ ॥
दुःखे सुखे च रज एव बभूव हेतुः
तादृग्विधे महति गौतमधर्मपत्न्याः ।
यस्माद्गुणेन रजसा विकृतिं गता सा
रामस्य पादरजसा प्रकृतिं प्रपेदे ॥ ९४ ॥

तस्मिन्नहल्यया गौतमेन च कृतमातिथ्यं विश्वामित्रः सराजपुत्रः प्रतिगृह्य मिथिलोपकण्ठभुवि जनकयजनभवनमभजत । तदनु जनकेन विधिवदभ्यर्चिते तस्मिन्निमिकुलपुरोधाः शतानन्दो रघुनन्दनमेवमभाषत ।

तिष्ठन्क्षत्रार्हवृत्तौ मुनिरगमदसावाश्रमं ब्रह्मसूनोः
आतिथ्यं तत्र लब्ध्वा निरवधि सुरभेः प्राभवादित्यवेत्य ।
सा तेन प्रार्थिताभूत्तदनु मुनिवरे नाभ्युपेते चकर्ष
क्रोशन्तीं तां तथैव प्रचुरबलजुषा कांदिशीको बभूव ॥ ९५ ॥

बहुशस्तद्बलचकितस्य तपोबलाधिगतविविधायुधनिगमस्य भूयोऽपि सुरभिनिमित्तं समारब्धसमरस्य दिव्यास्त्रपरम्परां ब्रह्मदण्डेन निरुन्धन्नरुन्धतीजानिरवतस्थे । ततोऽयं जातव्यलीकः क्षात्रात् तेजसः परं ब्राह्ममेव महो महीय इति निश्चित्य तत्सिद्धये दक्षिणस्यां दिशि तीव्रतरं तपश्चचार । अथ सावित्रः क्षत्रियस्त्रिशङ्कुः सशरीरः स्वर्गसिद्धिमभ्यर्थयमानो वसिष्ठेन प्रत्याख्यातस्तस्य पुत्रैर्महोदयादिभिर्निर्बन्धकुपितैर्दत्तचण्डालभावस्तमेनं शरणमभजत । असावपि तन्मनोरथपरिपूर्तये क्रतुमेकं प्राक्रमत । तत्र समागतेषु ब्राह्मणेषु जुगुप्सया त्रिशङ्कोरनागतान्वसिष्ठपुत्रानयं शापेन श्वभक्षकानकरोत् । ततः क्रतुभुजां वर्गोऽपि स्वर्गादनवतीर्णः ।

अयं महात्मा तपसः प्रभावादारोपयामास दिवं त्रिशङ्कुम् ।
नीलाम्बरं निह्नुतराजवेषं वर्षानिशीथादविशेषवेषम् ॥ ९६ ॥ ततः
अपातयत्स्वर्गमुपाश्रयन्तं संजातमन्युः शतमन्युरेनम् ।
ततोऽवलम्ब्यास्य नियोगशङ्कुं लेभे त्रिशङ्कुर्गगने प्रतिष्ठाम् ॥ ९७ ॥

ततो गीर्वाणगणप्रार्थनया परित्यक्तभुवनान्तरनिर्माणकर्माणं तत्र तपःप्रत्यूहः प्रत्युद्भूत इति पश्चिमायां दिशि पुष्करे पुष्कलं तपश्चरन्तममुमम्बरीषयज्ञपशुविनाशप्रायश्चित्तार्थं बह्वीभिर्गोभिः क्रीत्वा नरपशुतां नीयमानस्तावदृचीकस्य मध्यमपुत्रः शुनःशेपः शरणमयाचत । अयं भगवान्निजतनयविनिमयेन रक्षितुमेनमुन्मुखः पराङ्मुखेभ्यस्तेभ्यो हविष्यन्दादिभ्यः शापेन वसिष्ठपुत्रदशां दत्त्वा गाथाद्वन्द्वप्रीताभ्यामिन्द्रोपेन्द्राभ्याममम्बरीषं शुनःशेपं च परिपूर्णमनोरथौ कारयामास । ततस्तपस्यन्तमेनं मेनकासङ्गतस्तपोभङ्गश्चिरमङ्गीचकार । पश्चात्पश्चात्तापाभिभूतोऽयमुत्तरे भूभृति कौशिकीतीरे घोरं तपश्चचार । तत्र जम्भारिप्रहितां रम्भां शैली

भवेति शङ्कया पूर्वस्यां दिशि निरस्तनिश्वासं तपश्चरत्यमुष्मिन्नुष्मणा तपोभेरुद्विग्नितामरसखस्तामरसासनः सन्निधाय जितेन्द्रियत्वाद्ब्रह्मर्षिरसि, वसिष्ठोऽप्येवं व्याहरतु भवन्तमित्यभाषत ।

असौ वसिष्ठनिर्देशाद्ब्रह्मर्षित्वमविन्दत ।
यथोपनयसंस्काराद्द्विजन्मा ब्रह्मवर्चसम् ॥ ९८ ॥

इति जनकपुरोधःश्लाघितो गाधिसूनुः
सह नृपतनयाभ्यां शर्वरीं तत्र नीत्वा ।
विधिवददिशदर्घ्यं पुष्पदर्भाग्रगर्भं
सरसिजदयिताय ज्योतिषे छान्दसाय ॥ ९९ ॥

तदनु जनकराजधानीं रामलक्ष्मणनिरीक्षणकौतुकादनवरतपतितेन विकचकुवलयनिचयोपचीयमनमेचकमरीचिमलिम्लुचेन पौरनारीलोचनरोचिषा कवचितनरपतिपथां विश्वामित्रः प्रविश्य दशरथतनयावित्यभाषत । अस्यां खलु नगर्यामारब्धयज्ञस्य राज्ञो जनकस्य भागधेयात्सीतानामधेयभाजनमजीजनत्कन्यारत्नं रत्नगर्भा भगवती । अस्याः पुनः किमपरं माहात्म्यम् ।

यतः, देव्या यस्या वसनमुदधिः पीठिका हाटकाद्रिः
हारः सिन्धुः सगरतनयस्वर्गमार्गैकबन्धुः ।
क्रीडाशैलः प्रथमपुरुषक्रोडदंष्ट्रा च तस्याः
सीतामातुर्जगति मिथिलां सूतिकागेहमाहुः ॥ १०० ॥

तत्र सीताविवाहार्थममरैरपि दुष्करम् ।
जनकः कल्पयामास धनुरारोपणं पणम् ॥ १०१ ॥

ततो महर्षिर्जनकस्य राज्ञः सभां सुधर्मासदृशीं प्रपेदे ।
तौ चापतुश्चापविलोकलोलौ सचापकौ कोसलराजपुत्रौ ॥ १०२ ॥

तत्र विधिवदभ्यर्चितः कथितदशरथतनयवृत्तान्तः कौशिकः कौशिकप्रमुखैरमरैरस्मत्कुलमहत्तरे देवराते निक्षिप्तं विशेषतः सीताशुल्कार्थं मया

रक्षितमिदमिति जनकेन प्रदर्शितस्य चापस्यारोपणाय राममादिदेश ।

ततः रामे बाहुबलं विवृण्वति धनुर्वंशे गुणारोपणं
मा भूत्केवलमात्मना तिलकिते वंशेऽपि वैकर्तने ।
आकृष्टं नितरां तदेव न परं सीतामनोऽपि द्रुतं
भङ्गस्तस्य न केवलं क्षितिभुजां दोःस्तम्भदम्भस्य च ॥ १०३ ॥

रामाकर्षणभग्नकार्मुकभुवा ध्वानेन रोदोरुधा
दृप्तक्षत्रयशःसितच्छदकुले जीमूतनादायितम् ।
वीरश्रीप्रथमप्रवेशसमये पुण्याहघोषायितं
सीतायाः किल मानसे परिणये माङ्गल्यतूर्यायितम् ॥१०४॥

नवः कठिनकर्षणत्रुटितचापजन्मा क्षणात्
दिशां द्विरदघींकृतः कृतहरित्पतिस्वागतः ।
जगद्भ्रमणकौतुकोच्चलितरामकीर्त्यङ्गना-
प्रयाणपटहध्वनिं प्रथयति स्म तारध्वनिः ॥ १०५ ॥

तत्र दशरथः सीतापरिणयकृतनिश्चयजनकप्रहितदूताहूतः पुरोहिता-भ्युपगमान्मिथिलामुपागमत् ।

यत्कीर्तिस्तिलकायते सुरवधूसंगीतगोष्ठीमुखे
येनाद्यः पितृमान्पुमान्वसुमती येनैव राजन्वती ।
इन्द्रः संगरसंकटेषु विजहौ वीरस्य यस्योन्मुख-
प्रेङ्खत्स्यन्दनकेतनाम्बरदशासंदर्शनाद्दुर्दशाम् ॥ १०६ ॥

जनकः स्वकनीयांसमाजुहाव कुशध्वजम् ।
हत्वा युधि सुधन्वानं सांकाश्ये स्थापितं पुरे ॥ १०७ ॥

तदनु ताभ्यामभ्यर्चितः सपुरोहितो दशरथस्तत्र पुत्राणां गोदान-मङ्गलं निर्वर्तयामास ।

जग्राह जनकात्सीतां तातादेशेन राघवः ।
आम्नायशासनेनार्चां यजमानादिवानलः ॥ १०८ ॥

आश्चर्यमेतत् ।

गुणमनिमिषचापे कंचिदारोप्य सीतां
कुशिकतनयवाक्यादग्रहीद्रामभद्रः ।
तदनु तदनुजन्मा मैथिलेन्द्रस्य चित्त
निहितबहुगुणः सन्नूर्मिलां लक्ष्मणोऽपि ॥ १०९ ॥

ततो भरतशत्रुघ्नौ कुशध्वजनियोगतः ।
माण्डवीश्रुतकीर्तिभ्यामभूतां गृहमेधिनौ ॥ ११० ॥

अथ दशरथः तनयैः सह कृतविवाहैर्विदेहेभ्यः प्रतिनिवर्तमानः संवर्तसमयमुज्जृम्भितहुतवहदुःसहरोषं भीषणदुर्वारपराक्रमं क्षत्रवर्गगर्वसर्वंकषपरश्वधधाराधीनरुधिरधाराकल्पितपितृतर्पणं दर्पवतामग्रेसरमुग्रप्रतापिनं तपःसमुचितवल्कलवसानमपि वासनावशादनतिपरिमुषितयुद्धश्रद्धं मध्येमार्गं भार्गवं मुनिं राममद्राक्षीत् । अप्राक्षीच्च तन्निरीक्षणादेव प्रक्षीणहर्षोऽपि महर्षिभिः सह विधाय सपर्यामार्यशील, कुशलमिति ।

अथ दशरथवाणीं तामशृण्वन्प्रसन्नां
भृगुपतिरिदमूचे प्रश्रितं रामभद्रम् ।
अवजिगमिषुरासं जीर्णचापात्तकीर्तेः
अविदितपरशोस्ते दोर्मदं कार्मुकेऽस्मिन् ॥ १११ ॥

आदाय तत्सगुणमाशु विधाय तत्र
संधाय बाणमवधार्य तपोधनत्वम् ।
तज्जीवितस्य दयमानमना मनीषी
संभूतघोरसमराद्विरराम रामः ॥ ११२ ॥

तावुभौ च भृगुवंशसंभवौ चापदण्डजमदग्निसंभवौ ।
प्रह्वभावमवलम्ब्य केवलं राघवार्पितगुणौ बभूवतुः ॥ ११३ ॥

युगपत्प्राप्तगुणयोश्चापभार्गवरामयोः ।
ऋजुता वक्रतां प्राप वक्रतापि तथार्जवम् ॥ ११४ ॥

ततस्तत्क्षणममोघेन राघवः शरेण भार्गवस्य स्वर्गतिं रुरोध । स्थाने हि तत् ।

नूनं जनेन पुरुषे महति प्रयुक्तम्
आगः परं तदनुरूपफलं प्रसूते ।
कृत्वा रघूद्वहगतेः क्षणमन्तरायं
यद्भार्गवः परगतेर्विहतिं प्रपेदे ॥ ११५ ॥

अथ संक्रान्तया जामदग्न्यशक्तिसंपदा संपन्नं पन्नगपरिवृढभोगभुजाभिरामं राममविरलमालिङ्ग्य मूर्ध्न्युपाघ्राय दशरथः परिखयेव परिसरे परिसरन्त्या सरयूसरितानुविद्धामयोध्यां दारकान्सदारान्सादरमवलोकयन्तीनां पौरपुरंध्रीणां नीरन्ध्रितगवाक्षैः कटाक्षैः सौन्दर्यवञ्चिततापिञ्छैः पिञ्छातपत्रायमाणधवलातपत्रः प्रविवेश ।

लज्जावशादविशदस्मरविक्रियाभिः
ताभिर्वधूभिरतिवेलमवाप्तसौख्यान् ।
इक्ष्वाकुनाथतनयान्प्रथमो रसानां
तारुण्ययोगचतुरश्चतुरः सिषेवे ॥ ११६ ॥

विद्ययेव त्रयीदृष्ट्या दर्भपत्राग्रधीः सुधीः ।
राजपुत्र्या तया रामः प्रपेदे प्रीतिमुत्तमाम् ॥ ११७ ॥

इति श्रीविदर्भराजविरचिते
चम्पूरामायणे बालकाण्डं समाप्तम्

—*—

Price List *May 1954*

SAMSKRITA SAHITYA SADANA

386, Chaluvamba Agrahar, Mysore.

Sanskrit works with English Translation, Notes etc.

DRAMA

		Rs	As
PRATIJÑĀ-YAUGANDHARĀYAṆAM of Bhāsa	...	2	0
SVAPNAVĀSAVADATTAM of Bhāsa	...	2	8
PRATIMĀNĀṬAKAM of Bhāsa	...	3	6
ABHISHEKANĀṬAKAM of Bhāsa	...out of stock		
PANCHARĀTRAṀ of Bhāsa	...out of stock		
MĀLAVIKĀGNIMITRAM of Kāḷidāsa	...	2	0
ABHIJÑĀNA S'ĀKUNTALAM of Kāḷidāsa	....	2	8
NĀGĀNANDAM of S'rī Harṣa	...	2	12
RATNĀVALĪ of S'rī Harṣa	...	3	4
MUDRĀRĀKṢASAM of Vis'ākhadatta	...	4	4
RATNĀVALĪ : Kannada Trans, with Notes...		1	8

CHAMPU

NĪLAKAṆṬHA VIJAYA, Chapter III	...	1	8
CHAMPU RĀMĀYAṆAM (Bāla Kāṇḍa)	...	1	0
Selections in Sanskrit Prose and Verse	...	1	8

PROSE

KĀDAMBARĪ: PŪRVABHĀGA (Part I) of Bāṇa	2	8
KĀDAMBARĪ: do (Part II)	3	0
KĀDAMBARĪ: do (Part IV)	2	8
KĀDAMBARĪ: (Part V) MAHĀS'VETĀ-VṚTTĀNTA	4	0
KĀDAMBARĪ: (Part VI) KĀDAMBARĪ-VṚTTĀNTA	3	0

POETRY

KUMĀRASAMBHAVAM Cantos I, & of Kāḷidāsa	2	0
do Canto V	1	4
do Canto VI	1	0
RAGHUVAMS'AṀ Canto XIV of Kāḷidāsa	1	8
do Canto XIII with Eng & Kan. Trans, Notes	1	4
KUMĀRASAMBHAVA Canto III with Kan & Eng Trans	0	12
BUDDHACHARITA I with Eng. & Kan. Trans. Notes	1	4
do III with Kan. & Eng. Trans. Notes	1	4

CHAMPURAMAYANA

BALAKANDA

WITH INTRODUCTION, NOTES, ETC.

BY

S. RANGACHAR, M. A.

PUBLISHED BY
R. SREENIVASACHAR
SAMSKRITA SAHITYA SADANA
(SANSKRIT LITERATURE SOCIETY)

211, Visvesvarapuram BANGALORE—4

386, Cheluvamba Agrahar MYSORE

BALAKANDA

WITH INTRODUCTION, NOTES, ETC.

BY

S. RANGACHAR, M. A.

PUBLISHED BY

R. SREENIVASACHAR

SAMSKRITA SAHITYA SADANA

(SANSKRIT LITERATURE SOCIETY)

211, VISVESVARAPURAM BANGALORE—4

386, CHELUVAMBA AGRAHAR MYSORE

1954

–: PRINTERS :–

1. SAMSKRITA SAHITYA SADANA, MYSORE

2. K. V. V. PRESS, MYSORE

INTRODUCTION

Preliminary — A literary composition is generally termed Kāvya in Sanskrit. This Kāvya is of two kinds— 1. Dṛs'ya and 2. S'ravya. Under Dṛs'ya we have the Drama and such other 'see-able' literary writings, while under S'ravya, we have 1. The Prose 2. Poetry and 3. A Mixed variety of prose and poetry called the Campū. This last species is expected to provide full scope for the poet to show his talents.

Champu — The *proso-poetic* form of composition must have earned recognition by about the beginning of the Christian era, as we find in the Purāṇas[1] verse coming amidst prose, although no Campū work bearing a date earlier than 10 th cent. A.D. has been available in classical literature. There can also be no doubt that the Campū species had become quite popular earlier than the 6th cent. A. D., for, Daṇḍin (6th cent.) refers to it in his Kāvyādars'a and offers the definition गद्यपद्यमयी चम्पूः . The earliest Campūs that are available, however, belong to the 10th cent. A.D. and they are (1) the Naḷacampū of Trivikrama (914-16 A D.) and (2) the Yas'astilaka of Somadeva (951 A.D.). There is another by name Jīvandharacampū by Haricandra, of uncertain date. This work has been assigned to the 6th cent. AD. by some scholars, on the ground that Bāṇa refers in his work to a writer of that very name ; but Prof. T.S. Kuppu-

---

1. Even in the Vedic Ākhyānas, this form of composition is found; cf. S'unahs'ephopākhyāna, otherwise known as Haris'candropākhyāna in the Aitareyabrāhmaṇa. Later than this, we find the same form of composition in the Buddhistic Jātakas and fables.

swamy Sastry holds that the work belongs to a date later than 900 A.D. It is true that a Haricandra is spoken of as a celebrated writer (of prose) by Bāṇa, but it is not possible to say that he is the same as the author of the Campū work in question.

A good many Campūs were written after the 10th cent. A.D. The chief of them are 1. Rāmāyaṇacampū of Bhoja (?), 2. Bhāratacampū of Ananta Bhaṭṭa (16th cent. A.D.), 3. Vis'vaguṇādars'a of Venkaṭādhvarin (17th cent. A.D.), 4. Nilakaṇṭhavijaya of Nilakaṇṭha Dīkṣita (17th cent. A.D.) a kinsman of Appayya Dīkṣita, and 5. Bhāgavatacampū. These five are considered generally to form the Pañcacampūs.

The Champu Ramayana—(Sometimes called Rāmāyaṇa Campū) is a proso-poetic composition narrating the story of Rāma as described in detail by Vālmiki in his Rāmāyaṇa. Many a time the very words of Vālmīki are used in the course of the work. Every Kāṇḍa begins with the same word as the one found at the commencement of the corresponding Kāṇḍa in the Rāmāyaṇa. The work is very popular. This popularity appears to be due to its being a very faithful narration of Vālmiki's version of the story of Rāma, in an elegant language.

The CampūRāmāyaṇa assigned to Bhoja is an incomplete work, as the author wrote up to the end of the Sundara-Kāṇḍa only. The subsequent (Yuddha) Kāṇḍa has been supplemented by Lakṣmaṇa [2], son of Gaṅgādhara and

2. The story of Yuddhakāṇḍa has been supplemented also by Rajacūdāmaṇidikṣit (see Adyār Sanskrit Mss.

Gaṅgāmbikā. He lived in a village named Sanagara, probably in the Circars. He is the author also of the Bhāratacampūtilaka.

The sequel to this work embracing the Uttara Kāṇḍa of the Rāmāyaṇa is called the Uttaracampū. Besides the one noticed as XVI 8180 in the Descriptive Catalogue of the Saṁskṛt Mss. of the Mysore Oriental Library and printed in Mysore, there are other Uuttaracampūs by Yatirāja, by S'aṅkarācārya, by Hariharānanda, by Rāghavācharya, by Garalapuri Sastrin and by Venkatādhvarin.

The Campūrāmāyaṇa has been commented upon by Rāmacandra, Kāmes'vara, Nārāyaṇa, Mānaveda, Ghanas'yāma and an anonymous person.

The Author — The view that the CampūRāmāyaṇa is the work of Bhoja (of Dhārā) is probably wrong; for, the colophon of the work simply states that it is "Vidarbharāja viracita." The exact name of the author is not mentioned. But at the beginning of the Yuddhakāṇḍa, its author Lakṣmaṇa clearly states that the earlier Kāṇḍās were composed by Bhoja, [3] which we may accept as quite reliable, Then comes the question 'Who is this Bhoja?' He cannot be the

---

Catalogue II 22), by Ghanas'yāma — [D.C.] Descriptive Catalogue, Madras Oriental Mss. Library XXII 8615-16.) and by Ekāmbaranātha (E. Hultzsch's Reports, Madras 1905, III No 1681.)

3 *Cf*, चेतः स्निह्यति तत्र देशिकपदाम्भोजे च भोजे मम· 1. d. and भोजेन तेन रचितामपि पूरयिष्यन्नल्पीयसापि वचसा etc. 2 *ab.*; also Ghanas'yāma (Tanj. Palace Mss. Cat. VII 3149)—. अथ विदर्भदेशाधिपतिः कविवदान्यः स्वयं कविः भोजराजः पञ्चकाण्डीं...

same as the author of the Sarasvatikaṇṭhābharaṇa, S'ṛṅgāraprakās'a etc. as the colophons of these works are not the same as that of the Campūrāmāyaṇa. Cf.

I (*a*) इति श्री महाराजाधिराज श्री भोजदेवविरचिते सरस्वतीकण्ठाभरणे...

(*b*) इति श्री महाराजाधिराज श्री भोजदेवविरचिते शृङ्गारप्रकाशे......।

II इति श्री विदर्भराजविरचिते चम्पूरामायणे......।

The Sarasvatikaṇṭhābharaṇa, S'ṛṅgāraprakās'a and other works are assigned to Bhoja of Dhāra, The city of Dhāra is in Mālva, while Vidarbha, of which the author of the Campūrāmāyaṇa was king, is Berar. There is also this geographical difficulty to accept the identity.

Life of Bhoja — Bhoja of Dhāra (to whom tradition assigns the Campūrāmāyaṇa) was the celebrated king of the Paramāra dynasty. He is known to have been a contemporary of king Anantha of Kās'mīr (1028–1089 A.D.). Bhoja had a very glorious reign between 1018and 1063 A.D. Abdul Fazl, in his Aini Akbari says that it was Bhoja who shifted his capital to Dhāra from Ujjaini.

Bhoja was a great warrior. He fought several battles with neighbouring kings as also with the forces of Muhammad of Ghazni. Besides this, he was a great patron of learning, being himself very learned. "A Mosque at Dhārā now occupies the site of the King's Samskṛt College, in a temple dedicated appropriately to Saraswatī, the goddess of Learning." "The great Bhojpur lake, a beautiful sheet of water to the south-east of Bhopal, covering an area of 350 sq. miles formed by masonic embankments closing the outlet in a circle of hills, was his noblest monument and continued to testify to the skill of his engineers until the 15th century,

when the dam was cut by order of a Mohamadan king and the water drained off. The bed of the lake is now a fertile plain intersected by the Indian Midland Railway."

There are a few works named Bhojaprabandha, which describe Bhoja as scholar, poet and patron of learning and give us an account of his life. The works are variously written by Ballāḷa, Merutuṅga, Rājavallabha, Vatsarāja, Subhas'īla, and Padmagupta. There is also an anonymous poem Bhojaprabandhasāra, besides Bhojacarita, and Bhojarājasaccarita—a play in two acts by Vedānta Vāgīs'a Bhattācārya.

The following early life of Bhoja can be gathered from the Bhojaprabandha and Bhojarājāṅka, an One Act play, by Sundaravīrarāghava.[4] Bhoja was a minor when his father Sindhula died; and hence, his uncle Muñja ascended the throne. The young prince was very popular and had become proficient in all the *kalās*. Envious of this, Muñja consulted an astrologer regarding the future of Bhoja and to his dismay learnt that he would reign for 55 years[5]. Thereupon Muñja decided to have the prince murdered secretly in a jungle and entrusted a tributary of his, named Vatsarāja, with the task of carrying out his decision. But the latter took pity on the young prince and concealed him somewhere. He however informed the king that he had murdered Bhoja and in proof of that showed him a sword besmeared with blood.

4. See Triennial Cat. II 2413.
5. The astrologer's prediction was—

पञ्चाशत्पञ्चवर्षाणि सप्तमासा दिनत्रयम् ।
भोजराजेन भोक्तव्यः सगौडो दक्षिणापथः ॥

He also gave him a green leaf on which a s'loka[6] was written by Bhoja in his own handwriting, to point out that temporal fortunes were after all hollow. On reading it Muñja became full of remorse. Later, learning that Bhoja was alive, he vacated the throne in his favour and retired to the forest as an ascetic.

Several humorous stories about Bhoja's court-poets are related by Revaṇa Ārādhya (10th cent. A.D.) in his Kavisamayavilāsa.

Works of Bhoja—Many works on various branches of general and scientific literature such as grammar, philosophy, astronomy, medicine, law, architecture and trade are attributed to Bhoja. The following are a few of his popular works.

ORIGINAL WORKS— 1 सरस्वतीकण्ठाभरण; 2 शृङ्गारप्रकाश; 3 सङ्गीतप्रकाश; 4 आख्यायिकाशृङ्गारमञ्जरी; 5 चम्पूरामायणम्; 6 शिवदत्तस्तोत्रम् 7 विद्याविनोदः 8 चाणक्यनीतिसारः (?) 9 शालिहोत्रम् 10 तत्वप्रकाशः 11 युक्तिकल्पतरुः 12 सुभाषितानि (an Anthology)

COMMENTARIES.— 1 राजमार्तण्डः 2 रघुवंशव्याख्या; 3 शिवतत्वरत्नकलिका 4 राजवार्तिक (सांख्य)



6 मान्धाता च महीपतिः कृतयुगालङ्कारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः ?
अन्ये चापि युधिष्ठिरप्रभृतयो याता दिवं भूपते
नैकेनापि समं गता वसुमती, नूनं त्वया यास्यते ॥

॥ श्रीः ॥

चम्पूरामायणे बालकाण्डम्

—*—

लक्ष्मीं तनोतु नितरामितरानपेक्षम्
अङ्घ्रिद्वयं निगमशाखिशिखाप्रवालम् ।
हैरम्बमम्बुरुहडम्बरचौर्यनिघ्नं
विघ्नाद्रिभेदशतधारधुरंधरं नः ॥ १ ॥

उच्चैर्गतिर्जगति सिद्ध्यति धर्मतश्चेत्
तस्य प्रमा च वचनैः कृतकेतरैश्चेत् ।
तेषां प्रकाशनदशा च महीसुरैश्चेत्
तानन्तरेण निपतेत्क नु मत्प्रणामः ? ॥ २ ॥

गद्यानुबन्धरसमिश्रितपद्यसूक्तिः
हृद्या हि वाद्यकलया कलितेव गीतिः ।
तस्माद्दधातु कविमार्गजुषां सुखाय
चम्पूप्रबन्धरचनां रसना मदीया ॥ ३ ॥

वाल्मीकिगीतरघुपुंगवकीर्तिलेशैः
तृप्तिं करोमि कथमप्यधुना बुधानाम् ।
गङ्गाजलैर्भुवि भगीरथयत्नलब्धैः
किं तर्पणं न विदधाति नरः पितॄणाम् ॥ ४ ॥

— कथारम्भः —

वाचं निशम्य भगवान्स तु नारदस्य
प्राचेतसः प्रवचसां प्रथमः कवीनाम् ।
माध्यंदिनाय नियमाय महर्षिसेव्यां
पुण्यामवाप तमसां तमसां निहन्त्रीम् ॥ ५ ॥

तत्र कंचन क्रौञ्चमिथुनादेकं पञ्चशरविद्धमपि व्याधेनानुविद्धं निध्यायतो बद्धानुकम्पस्य भगवतो वाल्मीकेर्वदनारविन्दाच्छन्दोमयी काचिदेवं निःससार सरस्वती ॥

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ ६ ॥

तदनु समयोचितकृत्यं निर्वर्त्य स्वाश्रमं प्रति गतवति भगवति वाल्मीकौ

वाणीविलासमपरत्र कृतोपलम्भम्
अम्भोजभूरसहमान इवाविरासीत् ।
आभाति यत्कृतिरनेकविधप्रपञ्च-
व्याजेन्द्रजालविधिसाधकपिञ्छिकेव ॥ ७ ॥

ततः परमहर्षेण महर्षिणा विधिवदभ्यर्चितः परमेष्ठी मध्यलोकेऽपि स्ववृत्तं प्रकाशयितुं किल भवन्तमेवोपतिष्ठमानयानया भारत्या रामचरितं यथाश्रुतं व्याक्रियतामिति व्याहृत्यान्तरधात् ।

अथ सरसिजयोनेराज्ञया रामवृत्तं
करबदरसमानं प्रेक्ष्य दृष्ट्या प्रतीच्या ।
शुभमतनुत काव्यं स्वादु रामायणाख्यं
मधुमयफणितीनां मार्गदर्शी महर्षिः ॥ ८ ॥

एवं प्रबन्धं प्रयोक्तुं कः समर्थ इति चिन्तामुपगतवति सति भगवति वाल्मीकौ ।

उपागतौ मिलितपरस्परोपमौ
बहुश्रुतौ श्रुतिमधुरस्वरान्वितौ ।
विचक्षणौ विविधनरेन्द्रलक्षणौ
कुशीलवौ कुशलवनामधारिणौ ॥ ९ ॥

एतौ मुनिः परिगृह्य स्वां कृतिमपाठयत् । तौ पुनरितस्ततो गायमानौ दृष्ट्वा रामः प्रहृष्टमनाः स्वभवनमानीय भ्रातृभिः परिवृतो निजचरितं गातुमन्वयुङ्क्त । ततश्च

छन्दोमयीनां निलयस्य वाचामन्ते वसन्तौ मुनिपुंगवस्य ।
एतौ कुमारौ रघुवीरवृत्तं यथाक्रमं गातुमुपाक्रमेताम् ॥ १० ॥

पुनाम्नाम नरकात् त्रायते ... पुत्रः

अस्ति प्रशस्ता जनलोचनानामानन्दसंदायिषु कोसलेषु ।
आज्ञासमुत्सारितदानवानां राज्ञामयोध्येति पुरी रघूणाम् ॥ ११ ॥

तामावसद्दशरथः सुरवन्दितेन
संक्रन्दनेन विहितासनसंविभागः ।
वृन्दारकारिविजये सुरलोकलब्ध-
मन्दारमाल्यमधुवासितवासभूमिः ॥ १२ ॥

अथास्मिन्ननपत्यतया दूयमानमानसे पुत्रार्थं क्रतुमश्वमेधं विधातुं मन्त्रिभिः समं मन्त्रयमाणे दशरथे सुमन्त्रः प्रहृष्टमना महर्षेरङ्गदेशसंगतावग्रहनिग्रहशौण्डस्य विभाण्डकसूनोरवश्यमृष्यशृङ्गस्य प्रसादात्प्रभवो भविता कुमाराणामिति सनत्कुमारोदीरितं पुरावृत्तमस्मै दशरथाय कथयामास ।

[सोऽपि सुमन्त्रवचनाच्छान्ताधिः शान्ताकुटुम्बिनं संबन्धिनं मुनिमानीय वसिष्ठादिष्टमश्वमेधाध्वरं सरयूरोधसि विधाय तत्र पुत्रीयामिष्टिं विधिवत् कर्तुमारभत । तदनु हविराहरणाय धरण्यां कृतावतरणाः सर्वे गीर्वाणगणाः शतमखप्रमुखाश्चतुर्मुखाय दशमुखप्रतापग्रीष्मसंप्लोषणमावेद्य तेन सह शरणमिति शार्ङ्गधन्वानं मन्वाना नानाविधप्रस्तुतस्तुतयः क्षीराम्बुराशिम् आसेदुः ।

संतापघ्नं सकलजगतां शार्ङ्गचापाभिरामं
लक्ष्मीविद्युल्लसितमतसीगुच्छसच्छायकायम् ।
वैकुण्ठाख्यं मुनिजनमनश्चातकानां शरण्यं
कारुण्यार्द्रं त्रिदशपरिषत्कालमेघं ददर्श ॥ १३ ॥

क्षीराम्भोधेर्जठरमभितो देहभासां प्ररोहैः
कालोन्मीलत्कुवलयदलद्वैतमापादयन्तम् ।
आतन्वानं भुजगशयने कामपि क्षौमगौरे
निद्रामुद्रां निखिलजगतीरक्षणे जागरूकाम् ॥ १४ ॥

प्रह्लादस्य व्यसनममितं दैत्यवर्गस्य दम्भं
स्तम्भं वक्षःस्थलमपि रिपोर्यौगपद्येन भेत्तुम् ।
बद्धश्रद्धं पुरुषवपुषा मिश्रिते विश्वदृष्टे
दंष्ट्रारोचिर्विशदभुवने रंहसा सिंहवेषे ॥ १५ ॥

नारायणाय नलिनायतलोचनाय
नामावशेषितमहाबलिवैभवाय ।
नानाचराचरविधायकजन्मदेश-
नाभीपुटाय पुरुषाय नमः परस्मै ॥ १६ ॥

इति प्रणम्योत्थितानेतान् स्तुतिरवमुखरितहरिन्मुखान्हरिहयप्रमुखान् अखिलानमरानरुणारुणतामरसविलासचोरैः लोचनमरीचिसंतानैरानन्दयन् अरविन्दलोचनः स्फुटमभाषत ।

अपि कुशलममर्त्याः ? स्वागतं सांप्रतं वः,
शमितदनुजदम्भा किं नु दम्भोलिकेलिः ?
अपि धिषणमनीषानिर्मिता नीतिमार्गा-
स्त्रिदशनगरयोगक्षेमकृत्ये क्षमन्ते ? ॥ १७ ॥

एवं भगवतः कुशलानुयोगपुरःसरीममृतासारसरसां सरस्वतीमाकर्ण्य संपूर्णमनोरथानां सुमनसां संसत्पुंसे परस्मै विज्ञापयामास । देव, कथम् अकुशलमाविर्भवेद्भवता कृतावलम्बानामस्माकम् ? किंतु ।

अस्ति प्रशस्तविभवैर्विबुधैरलङ्घ्या
लङ्केति नाम रजनीचरराजधानी ।
माणिक्यमन्दिरभुवां महसां प्ररोहैः
तेजस्त्रयाय दिनदीपदशां दिशन्ती ॥ १८ ॥

एनां पुराणनगरीं नगरीतिसालां
सालाभिराममुजनिर्जितयक्षराजः ।
हेलाभिभूतजगतां रजनीचराणां
राजा चिरादवति रावणनामधेयः । १९ ॥

यद्बाहुराहुरसनायितशस्त्रधारा
    दिक्पालकीर्तिमयचन्द्रमसं ग्रसन्ति ।
यद्वैरिणां रणमुखे शरणप्रदायी
    नैवास्ति कश्चिदमुमन्तकमन्तरेण ॥ २० ॥

अम्भोजसंभवममुं बहुभिस्तपोभिः
    आराधयन्वरमवाप परं दुरापम् ।
तस्मादशेषभुवनं निजशासनस्य
    लक्षीकरोति रजनीचरचक्रवर्ती ॥ २१ ॥

तेन वयं पराधीना इव भवामः । तथा हि । सोऽयं कदाचित्क्रीडाधराधरमारुह्य सावरोधवधूजनश्चरणाभ्यां संचरेत चेदागमिष्यत्याग इत्यनाविष्कृतातपो भयेन भगवान्सहस्रभानुरपि संकुचितभानुरेव तत्सानूनि नूनं संश्रयते । एष मृगाङ्कोऽपि मृगयायासपरिश्रांतिविश्रान्त्यै ससंभ्रमं नमज्जनपरिवृते मज्जनगृहाभिमुखे दशमुखे तत्रत्यविचित्रतरशातकुम्भस्तम्भाग्रप्रत्यग्रप्रत्युप्तस्फटिकशिलाशालभञ्जिकापुञ्जकरतलकलितनिजोपलमयकलशमुखाच्छाच्छामविच्छिन्नधारामम्बुधारां निजकराभिमर्शादापादयन् तस्य प्रसादपिशुनानां शुनासीरचिरकाङ्क्षितानां विंशतिविधवीक्षणानां क्षणमात्रं पात्रं भवति । तेन पुलस्त्यनन्दनेन संक्रन्दननन्दनात्स्वमन्दिरोद्यानमानीतस्य मन्दारप्रमुखस्य वृन्दारकतरुवृन्दस्य बन्दीकृतसुरसुन्दरीनयनेन्दीवरद्वन्द्वाच्च करारविन्दकलितकनककलशाच्च मन्दोष्णं स्यन्दमानैरम्बुभिर्जम्बालितालवालस्य पचेलिमानामपि कुसुमानां पतनभयमाशङ्कमानाः पवमानाः परिस्पन्दितुमपि प्रभवो न भवन्ति । एतेऽपि पावका हृदिशङ्कावहां हुतवहाख्यां वहन्तस्तद्गृहे गार्हपत्यपुरोगाः पौरोगवधुरं दधते । किं बहुना । स एष मानुषादवमाननमागमिष्यतीत्यमन्वानस्तदितैरवध्यत्वं चतुराननवराल्लब्ध्वा समुद्धतः संप्रति संप्रहारसमाक्रान्तदिगन्तदन्तावलदन्तकुन्त-

व्रणकिणसंपुटितवक्षःस्थलः स्थलकमलिनीं वनवार इव रावणस्त्रिलोकीमभिभवन्भवदीयानित्यस्मान्न जातु किंचिदपि जानातीति । अथ भगवानाकर्ण्य गीर्वाणगणवाणीम् —

इन्द्रनीलाचले दघ्रच्चन्द्रिकाधवलस्मितः ।
वाचमूचे सुधाधारां मधुरां मधुसूदनः ॥ २२ ॥

भवतामपराधविधायिनस्तस्य यातुधानस्य निधनमधुनैव विधातुं शक्यम् । किंतु सरसिजासनशासनमप्यमोघीकुर्वन्नुर्वीतले पुत्रीयतः सुत्राममित्रस्य दशरथस्य मनोरथमपि पूरयितुमादृतमानुषवेषः सन्नहमेव तं हनिष्यामीति व्याहृत्यान्तरधात् । ततः सा परिषदनिमिषाणामुन्मिषितहर्षा हृषीकेशादेशात्प्रशमितदुर्दशानि निर्दिशाननानि चतुर्दशभुवनानि बुद्ध्वा दुग्धसागरान्निरगात् । ततस्तानमरान्प्राह स पितामहः । भवन्तस्तावदवतरिष्यतो लक्ष्मीसहायस्य साहाय्यार्थमप्सरःप्रभृतिषु युवतिषु वानराच्छभल्लगोपुच्छनीलमुखवेषभृतः प्रथितप्रभावाः प्रजाः प्रजनयेयुरिति । पुरैव किल मम जृम्भारम्भे संभूतवाञ्जाम्बवानिति । ततस्ते गीर्वाणास्तथाकुर्वन् । अथ वैतानाद्वैश्वानरान्नरः प्राजापत्यः सहेमपात्रः कश्चिदुत्थाय पुलीयते दशरथाय पायसममृतप्रायं प्रायच्छत् । ततः —

कौसल्यायै प्रथममदिशद्भूपतिः पायसार्धं
प्रादादर्धं प्रणयमधुरं कैकयेन्द्रस्य पुत्र्यै ।
एते देव्यौ तरलमनसः पत्युरालोच्य भावं
स्वार्धांशाभ्यां स्वयमकुरुतां पूर्णकामां सुमित्राम् ॥ २३ ॥

अवभृथेऽवसिते सरयूतटादथ यथायथमुच्चलिते जने ।
दशरथः परिपूर्णमनोरथः पुरमगात्पुरुहूतपुरोपमाम् ॥ २४ ॥

अपाटवात्केवलमङ्गकानां मनोज्ञकान्तेर्महिषीजनस्य ।
शनैः शनैः प्रोज्झितभूषणानि चकाशिरे दौहृदलक्षणानि ॥ २५ ॥

मन्दमन्दमपयद्वलित्रया गाधतादिपयनाभिगह्वरा ।
कोसलेन्द्रदुहितुः शनैरभून्मध्ययष्टिरपि दृष्टिगोचरा ॥ २६ ॥

न्यग्रोधपत्रसमतां क्रमशः प्रयाताम्
अङ्गीचकार पुनरप्युदरं कृशाङ्ग्याः ।
जीवातवे दशमुखारगपीडितानां
गर्भच्छलेन वसता प्रथमेन पुंसा ॥ २७ ॥ अपि च

मध्यं तनुत्वादविभाव्यमानमाकाशमासीदसितायताक्ष्याः ।
गर्भोदये विष्णुपदापदेशात्कार्श्यं विहायापि विहाय एव ॥ २८ ॥

ततः— उच्चस्थे ग्रहपञ्चके सुरगुरौ सेन्दौ नवम्यां तिथौ
लग्ने कर्कटके पुनर्वसुयुते मेषं गते पूषणि ।
निर्दग्धुं निखिलाः पलाशसमिधो मेध्यादयोध्यारणेः
आविर्भूतमभूतपूर्वमपरं यत्किंचिदेकं महः ॥ २९ ॥

अपिच:— अथ राममभिधानेन कवेः सुरभयन्गिरः ।
अलंचकार कारुण्याद्रघूणामन्वयं हरिः ॥ ३० ॥

तमेनमन्वजायन्त त्रयस्त्रेताग्नितेजसः ।
अग्रजस्यानुकुर्वन्तस्तैस्तैर्लोकोत्तरैर्गुणैः ॥ ३१ ॥

भरतस्तेषु कैकेय्यास्तनयो विनयोज्ज्वलः ।
अन्यौ लक्ष्मणशत्रुघ्नौ सुमित्रायां कृतोदयौ ॥ ३२ ॥

एते ववृधिरे वीरा ब्रह्मक्षेमाय दीक्षिताः ।
लोकानन्दमुकुन्दस्य चत्वार इव बाहवः ॥ ३३ ॥

अथ कदाचिदपरिमेयमायाभयानकयुद्धसमुद्धतदैत्यबलावस्कन्दकांदिशीकवृन्दारकानीकपरिवार्यमाणरथः पंक्तिरथस्तपश्चर्याजातानामाश्चार्याणामायतनं त्रिशङ्कुयाजिनं भगवन्तं पद्यप्रबन्धमिव दर्शितसर्गभेदं प्राकृतव्याकरणमिव प्रकटितवर्णव्यत्यासं बुधमिव सोमसुतं कुशिकसुतमद्राक्षीत् तदनु यथाविधिकृतसपर्येण मर्यादातीतमहिम्ना महितेन गाधेतरहृदयेन

boundary. deep.

गाधिनन्दनेन सत्रपरित्राणार्थमित्थमभ्यर्थितोऽभूत् । राजन्, भवत-स्तनयेन विनयाभिरामेण रामेण शरासनमित्रेण सौमित्रिमात्रपरिजनेन क्रियमाणक्रतुरक्षो रक्षोदुरितमुत्तीर्य कृतावभृथो भवितुमभिलषामीति । एतदाकर्ण्य कर्णपरुषं महर्षिभाषितमतिमात्रपुत्रवात्सल्यात्कौसल्याजानिः सशल्यान्तःकरणोऽभूत् । ततस्तस्मिन्बहुप्रकारैरवार्यनिश्चये भगवति विश्वामित्रे दशरथस्तत्कुलहितेन पुरोहितेनैवमभिहितोऽभूत् ।

"पर्याप्तभाग्याय भवानमुष्मै कुर्यात्सपर्यां कुशिकात्मजाय ।
निर्यातुधानां वसुधां विधातुं निर्यातु रामः सह लक्ष्मणेन" ॥ ३४ ॥

एवं वसिष्ठेन प्रतिष्ठापितधृतिर्दशरथः सुतप्रदानेन कुशिकसुतमनोरथमेव पूरयामास ।

योगेन लभ्यो यः पुंसां संसारापेतचेतसाम् ।
नियोगेन पितुः सोऽयं रामः कौशिकमन्वगात् ॥ ३५ ॥

तत्र सत्रं परित्रातुं विश्वामित्रो महामुनिः ।
सौमित्रिसहितं रामं नयन्नयमवोचत ॥ ३६ ॥

बलेन तपसां लब्धे बलेत्यतिबलेति च ।
विद्येते मयि काकुत्स्थ विद्ये ते वितरामि ते ॥ ३७ ॥

ग्राम लक्ष्मण ततो गृहीतविद्यस्य दाशरथेः प्रदेशमेकं प्रदर्श्य भगवानित्थमकथयत् ।

अस्मिन्पुरा पुरभिदः परमेश्वरस्य
भालान्तरालनयनज्वलने मनोभूः ।
सद्यः प्रपद्य शलभत्वममुञ्चदङ्गं
तस्मादमुं जनपदं विदुरङ्गसंज्ञम् ॥ ३८ ॥

तदनु मानससरःप्रसृतां सरयूमतिक्रम्य वृत्रवधप्रवृद्धवृद्धश्रवःपङ्कक्षालनलब्धमलदकरूशनाम्नोर्जनपदयोः सीम्नि कृतपदयोर्दाशरथ्योः पुनरप्येवमब्रवीत् ।

यक्षः सुकेतुर्द्रुहिणप्रसादाल्लेभे सुतां कामपि ताटकाख्याम् ।
सुन्दः किलैनां परिणीय तस्यां मारीचनीचं जनयांबभूव ॥ ३९ ॥

एकदा सुन्दे निहते मारीचः कुम्भसंभवमभिभूय तस्य शापादवाप कौणपताम् । ताटकाप्यभूत्पुरुषादिनी । सेयमब्जासनसिद्धसिन्धुरसहस्रप्राणात्मजेन सह जनपदविपदं विदधाना व्यापादनीया त्वयेति । रामस्तमाकर्ण्य स्त्रीवधशङ्कामकरोत् । किंच । वैरोचनीं मन्थरां वसुंधरापराधधुरंधरां पुरंदरेण निहतां जनार्दनकृतमर्दनां च भार्गवजननीं प्रदर्श्य दाशरथेरमन्दां सुन्दवधूवधविचिकित्सामुत्सारयामास ।

आश्रुतः श्रुतवृत्तेन तेन सुन्दप्रियावधः ।
तमेवान्ववदत्तस्य चापः शिञ्जारवच्छलात् ॥ ४० ॥

तत्काले पिशिताशनाशपिशुना संध्येव काचिन्मुनेः
अध्वानं तरसा रुरोध रुधिरक्षोदारुणा दारुणा ।
स्वाधीने हनने पुरीं विदधती मृत्योः स्वकृत्यात्यय-
क्रोडत्किंकरसंघसंकटमहाशृङ्गाटकां ताटका ॥ ४१ ॥

अथ दाशरथेः कर्णमविशत्ताटकागुणाः ।
तथा धनुर्गुणस्तूर्णं प्राविशत्तज्जिघांसया ॥ ४२ ॥

ततो भाविनि संग्रामे बद्धश्रद्धस्य ताटका ।
स्वप्राणान्रामबाणस्य वीरपाणमकल्पयत् ॥ ४३ ॥

मुनिर्भृशाश्वोपज्ञानि ताटकामाथिने ददौ ।
अस्त्राणि जृम्भकादीनि जम्भशासनशासनात् ॥ ४४ ॥

प्रतिदिनमवदातैर्ब्रह्मभिर्ब्रह्मनिष्ठैः
प्रशमितभवखेदैः सादरं सेव्यमाने ।
बलिनियमनहेतोर्वामनः काननेऽस्मिन्
बलिनियमपरः सन्ब्रह्मचारी चचार ॥ ४५ ॥

अपहृतविबुधार्तेर्वामनस्याजमूर्तेः
अखिलभुवनभिक्षाश्रमानोकहानाम् ।
ततिरियमतिनीला व्याप्तदिग्व्योमसीमा
स्वयमपि परिमातुं लोकमभ्युद्यतेव ॥ ४६ ॥

इति विविधरसाभिः कौशिकव्याहृताभिः
श्रुतिपथमधुराभिः पावनीभिः कथाभिः ।
गलितगहनकृच्छ्रं गच्छतोर्दाशरथ्योः
समकुचदिव सद्यस्तादृशं मार्गदैर्घ्यम् ॥ ४७ ॥

ततः सिद्धाश्रमं प्रविश्य विश्वामित्रः सत्रमारभत । तदनन्तरमन्तरिक्षान्तरालादापतन्तमन्तकानीकभयानकं तं पलाशगणमवलोक्य पलायमानाः करगलितसमित्कुशाः कुशिकनन्दनान्तेवासिनःससंभ्रममभिलषिताहवाय राघवाय न्यवेदयन् ।

हृत्वाद्रेः शिखराणि तानि परितः क्षिप्त्वा हसित्वा क्रुधा
कृत्वा हस्तविघट्टनं तत इतः स्थित्वा नदित्वा मुहुः ।
सिक्त्वा क्ष्मामसृजा स्रजान्त्रकृतया बद्ध्वा कचान्खेचरान्
दग्ध्वाग्नेः सदृशा दृशा निशिचरा रुन्धन्ति रन्ध्रं दिवः ॥ ४८ ॥

तत्र । संक्रान्तवर्णान्तरगाधिसूनोः संपर्कपुण्यादिव रामभद्रः ।
क्षात्रक्रमात्पिप्पलदण्डयोग्यः पलाशदण्डाहतपाणिरासीत् ॥

मारीचनीचमतिराहवमारचय्य
क्षिप्तः क्षणेन रघुनायकसायकेन ।
मध्येपयोनिधि भयेन निमग्नमूर्तिः
वेषं पुपोष जलमानुषनिर्विशेषम् ॥ ५० ॥

सुबाहुराहवोन्मत्तः कृत्तः काकुत्स्थपत्रिणा ।
मुनीनामनभिप्रेतः प्रेतनाथातिथिः कृतः ॥ ५१ ॥

वंशस्पृशा हृदयहारिफलान्वितेन
रामेरितेन सहसा सहसायकेन ।
स्नेहार्दितेन निरगादनुरागिणीव
प्राणावलिर्हृदयतः पिशिताशनानाम् ॥ ५२ ॥

अथ निशिचरमाथाद्वीतवैतानविघ्नो
मुनिरवभृथकृत्यं विश्वहृद्यं समाप्य ।
अमनुत जयलक्ष्म्या राममाजौ समेतं
यजनजनितमूर्त्या योक्तुमव्याजलक्ष्म्या ॥ ५३ ॥

अथ मिथिलां प्रति प्रस्थितः कौशिकः काकुत्स्थमित्थमकथयत् । पुरा खलु कुशेशयासनजन्मा कुशाभिधानो राजर्षिः कुशाम्बप्रमुखैश्चतुर्भिः कौशाम्बीमहोदय–धर्मारण्य–गिरिव्रजाख्यानां पुरीणां कर्तृभिः पुत्री बभूव । कुशनाभस्तु घृताच्यां कन्याशतमजनयत् । कन्यास्ताः संनद्ध-यौवनाः कामयमानः पवमानः प्रत्याख्यानात्प्रत्यापन्नमन्युरासामवयवेष्व-नार्जवमतनुत । अथ विदितवृत्तान्तेन कुशनाभेन तेन क्षमामेव प्रतिक्रियां मन्यमानेन चूलिसूनवे सौमदेवाय राज्ञे ब्रह्मदत्ताय दत्तास्ताः प्रकृतिस्था बभूवुः । पुनरपि कुशनाभस्तु पुत्रीयन्पितुः प्रसादादगाधसत्त्वान्गाधिसं-ज्ञानस्तातपादानुदपादयत् । इत्थं दाशरथिः कौशिकोत्पत्तिकथानिशमन-निरायामयामिनीयामानुबन्धो बन्धूकस्तबकसुन्दरबन्धुरेण संध्यारागेण प्राचीमुखेन शोणीकृतेन शोणाभिधानं दधानेन नदेन प्रवर्तितप्रत्यूषकृत्यः कृतनियमेन मुनिना सह गङ्गामुपतिष्ठमानेन पथा प्रातिष्ठत ।

आजानपावनक्षीरां वृषानन्दविधायिनीम् ।
श्रुतिप्रणयिनीं सोऽयमापगामाप गामिव ॥ ५४ ॥

अथ भागीरथीकथां श्रोतुकामाय रामाय भगवानिदमभाषत ।

पुरा मनोरमा नाम सुमेरोरभवत्सुता ।
गृहमेधी तयैवासीच्चक्रवर्ती धराभृताम् ॥ ५५ ॥
कन्याद्वयममुष्यासीदेका मन्दाकिनी तयोः ।
अन्या भगवती साक्षाच्च द्रचूडकुटुम्बिनी ॥ ५६ ॥
तां नदीं विबुधा लब्ध्वा नाकलोकमनीनयन् ।
तपस्यन्तीं गिरिगौरीं देवाय महते ददौ ॥ ५७ ॥
शिवयोर्युञ्जतोर्वीर्यं दृष्ट्वा धात्र्यां समर्पितम् ।
पावकः प्रतिजग्राह देवतैरनुनाथितः ॥ ५८ ॥
अनपत्यानथामर्त्यान्बहुभार्यां च मेदिनीम् ।
अकरोदम्बिकाक्रोधः पुत्रालाभसमुद्भवः ॥ ५९ ॥
अथ सेनान्यमिच्छद्भिरुक्तः सब्रह्मभिः सुरैः ।
वह्निरह्नाय जाह्नव्यां न्यषिञ्चद्वीर्यमैश्वरम् ॥ ६० ॥
सापि सप्तार्चिषा क्षिप्तं तेजस्तद्वोढुमक्षमा ।
हिमवत्प्रान्तकान्तारे श्रान्ता शरवणे जहौ ॥ ६१ ॥
तत्राभूत्कृत्तिकाप्रीत्यै षोढारूढमुखाम्बुजम् ।
तारकध्वान्तविध्वंसि सद्यः षाण्मातुरं महः ॥ ६२ ॥
त्रैविध्यं श्रूयतां वत्स सरितस्त्रिदिवौकसाम् ।
यथोक्तं हव्यमश्नन्त्या देवताया इवाध्वरे ॥ ६३ ॥
पुरीमयोध्यामध्यास्त सावित्रः सगरो नृपः ।
केशिनीसुमतिभ्यां च लङ्घितप्रथमाश्रमः ॥ ६४ ॥
स पुत्रीयन्सपत्नीकस्तपस्तेपे समाः शतम् ।
भृगुः प्रीतमनास्तस्मै ददौ दायादसंपदम् ॥ ६५ ॥
असमञ्जं सुतं लेभे वैदर्भी केशिनी तयोः ।
षष्टिं पुत्रसहस्राणां सुमतिश्च यवीयसी ॥ ६६ ॥
असमञ्जसचारित्रमसमञ्जमपोह्य सः ।
आरब्धहयमेधः सन्नमुञ्चत तुरंगमम् ॥ ६७ ॥

Indeclinable.
past participle

क्रव्यादवपुषा सोऽयमहारि हरिणा हयः ।
ततस्तं नष्टमन्वेष्टुं सौमतेयाः प्रतस्थिरे ॥ ६८ ॥
सर्वे सपर्वतामुर्वीं खनन्तः सगरात्मजाः ।
चक्रुर्झर्झरितध्वान्तं नागलोकं नखांशुभिः ॥ ६९ ॥
त एते तपसा दीप्ते तमःस्तोमप्रमाथिनि ।
कापिले ज्वलने वीरा लेभिरे शलभोपमाम् ॥ ७० ॥
असमञ्जसुतं पौत्रमंशुमन्तमथाब्रवीत् ।
सप्तिं हृत्वा समाधत्तां सप्ततन्तुं भवानिति ॥ ७१ ॥
सोऽपि गत्वा बिलं तत्र दृष्ट्वा भस्मीकृतान्पितॄन् ।
साश्रुस्तेभ्योऽञ्जलिं दित्सुश्चिरं लेभे तुरंगमम् ॥ ७२ ॥
मातुलो गरुडस्तेषामेनं तत्रैवमब्रवीत् ।
गङ्गामिहानयायुष्मन्नेषामेषा गतिः परा ॥ ७३ ॥
ततस्तनयवृत्तान्तं श्रुत्वा लब्धतुरंगमः ।
समाप्य सगरः सत्रं पुत्रशोकाद्दिवं गतः ॥ ७४ ॥
अथांशुमानयं राज्यं चिराय परिपालयन् ।
दिलीपे न्यस्तभूभारस्तपस्तेपे हिमालये ॥ ७५ ॥
दिलीपेऽपि दिवं याते श्रुत्वा वृत्तं भगीरथः ।
अमर्त्यसरितं कर्तुं मेने मर्त्यतरंगिणीम् ॥ ७६ ॥
ततो गोकर्णमासाद्य तपस्यति भगीरथे ।
देवो देवापगां वोढुमन्वमंस्त दयानिधिः ॥ ७७ ॥
अथ वीचीजयच्छन्नदिगन्तगगनान्तरा ।
शशाङ्कशङ्खसंभिन्नतारामौक्तिकदन्तुरा ७८ ॥
तरंगाकृष्टमार्तण्डतुरंगायासितारुणा ।
फेनच्छन्नस्वमातङ्गमार्गणव्यग्रवासवा ॥ ७९ ॥
आविःशाखाशिखोन्नेयनन्दनद्रुमकर्षणा ।
एकोदकनभोमार्गदिङ्मूढदिवसेश्वरा ॥ ८० ॥

आवर्तगर्तसंभ्रान्तविमानप्लवविप्लवा ।
नीलजीमूतशैवालकृतरेखाहरित्तटा ॥ ८१ ॥
अवलेपभराक्रान्ता सुरलोकतरंगिणी ।
पपात पार्वतीकान्तजटाकान्तारगह्वरे ॥ ८२ ॥
अलब्धनिर्गमा शंभोः कपर्दादमरापगा ।
दधौ दूर्वाशिखालग्नतुषारकणिकोपमाम् ॥ ८३ ॥
अदृष्ट्वा तां नदीं तत्र तुष्टाव परमेश्वरम् ।
भगीरथो विधेः कार्यात्परिक्षीणमनोरथः ॥ ८४ ॥
गङ्गा सप्ताकृतिर्जाता न्यपतद्धरमूर्धनि ।
तेन स्तुत्या प्रसन्नेन क्षिप्ता विन्दुसरस्यपि ॥ ८५ ॥
तासु प्राचीं गतास्तिस्रस्तिस्रः प्राचेतसीं दिशम् ।
अन्या पितृक्रियोद्युक्तभगीरथपथानुगा ॥ ८६ ॥
सैषा भागीरथी जह्नोः सत्रक्षेत्रं समावृणोत् ।
तां स पीत्वा ततः शान्तो जह्नौ श्रोत्रेण वर्त्मना ॥ ८७ ॥
तया तटिन्या जाह्नव्या प्रापयत् त्रिदिवं पितॄन् ।
भगीरथः पुरं प्राप परिपूर्णमनोरथः ॥ ८८ ॥

अथ दाशरथिराकर्णितभागीरथीकथस्तां सरितं विलङ्घ्य विशालां विलोक्य पुरीं कस्येयमिति गाधिनन्दनमपृच्छत् । सोऽप्येवमवोचत् । पुरा खलु सुरासुराणां सुधानिमित्तं मिथोविरोधे प्रवृत्ते मायां विश्वमोहिनीं विश्वरूपः प्रदर्श्य दैतेयनिधनं शतधारपाणिना कारयामास । तेषां जननी दितिरतिवेलमन्युः शतमन्युशासनं कममि पुत्रं लब्धुकामा पत्युर्मारीचस्य वचनात्कुशप्लवे सुचिरं तपश्चचार । तां कैतवेन शुश्रूषमाणः शतधारपाणिः पादकलितकचकलापामापन्ननिद्रामपवित्रेति निर्वर्ण्यावगाहिततदीयजठरः सप्तधा गर्भं निर्भिद्य निर्जगाम । दितिरपि विदिततनयवृत्तान्ता

तान्यपि खण्डान्याखण्डलेन सप्तमरुतः कारयित्वा त्रिविष्टपं प्रविष्टा ।

अलम्बुसायामिक्ष्वाकोर्जातः कश्चिन्महीपतिः ।
विशालेति स्वनाम्नात्र विशालां विदधे पुरीम् ॥ ८९ ॥

तदनु तद्वास्तव्येन सुमतिनाम्ना नृपतिना कृतातिथ्यः सराजपुत्रो भगवान्विश्वामित्रस्तत्र निशीथिनीं नीत्वा मिथिलां प्रति प्रस्थितः प्रतपसामुत्तमस्य गौतमस्याश्रमं प्रदर्श्य तद्दारानुषक्तां कथामित्थमकथयत् ।

अत्रागमद्गौतमधर्मदारानार्यजुष्टेन पथा महेन्द्रः ।
स च क्रुधा निर्वृषणं वृषाणं भार्यामदृश्यां च मुनिश्चकार ॥ ९० ॥

वनमेतद्गते रामे शापमुक्ता भविष्यसि ।
इत्युक्त्वा गौतमः पत्नीं हिमाद्रिं तपसे ययौ ॥ ९१ ॥
इत्थं विदितवृत्तान्ते देवतानां गणे तदा ।
पितॄणां प्राभवाल्लेभे मेषस्य वृषणं वृषा ॥ ९२ ॥
तदेनामेनसो मुक्तां प्रतिगृह्णातु गौतमः ।
इति तस्याश्रमं भेजे साकं रामेण कौशिकः ॥ ९३ ॥
दुःखे सुखे च रज एव बभूव हेतुः
तादृग्विधे महति गौतमधर्मपत्न्याः ।
यस्माद्गुणेन रजसा विकृतिं गता सा
रामस्य पादरजसा प्रकृतिं प्रपेदे ॥ ९४ ॥

तस्मिन्नहल्यया गौतमेन च कृतमातिथ्यं विश्वामित्रः सराजपुत्रः प्रतिगृह्य मिथिलोपकण्ठभुवि जनकयजनभवनमभजत । तदनु जनकेन विधिवदभ्यर्चिते तस्मिन्निमिकुलपुरोधाः शतानन्दो रघुनन्दनमेवमभाषत ।

तिष्ठन्क्षत्रार्हवृत्तौ मुनिरगमदसावाश्रमं ब्रह्मसूनोः
आतिथ्यं तत्र लब्ध्वा निरवधि सुरभेः प्राभवादित्यवेत्य ।
सा तेन प्रार्थिताभूत्तदनु मुनिवरे नाभ्युपेते चकर्ष
क्रोशन्तीं तां तथैव प्रचुरबलजुषा कांदिशीको बभूव ॥ ९५ ॥

बहुशस्तद्बलचकितस्य तपोबलाधिगतविविधायुधनिगमस्य भूयोऽपि सुरभिनिमित्तं समारब्धसमरस्य दिव्यास्त्रपरम्परां ब्रह्मदण्डेन निरुन्धन्नरुन्धतीजानिरवतस्थे । ततोऽयं जातव्यलीकः क्षात्रात् तेजसः परं ब्राह्ममेव महो महीय इति निश्चित्य तत्सिद्धये दक्षिणस्यां दिशि तीव्रतरं तपश्चचार । अथ सावित्रः क्षत्रियस्त्रिशङ्कुः सशरीरः स्वर्गसिद्धिमभ्यर्थयमानो वसिष्ठेन प्रत्याख्यातस्तस्य पुत्रैर्महोदयादिभिर्निर्बन्धकुपितैर्दत्तचण्डालभावस्तमेनं शरणमभजत । असावपि तन्मनोरथपरिपूर्तये क्रतुमेकं प्राक्रमत । तत्र समागतेषु ब्राह्मणेषु जुगुप्सया त्रिशङ्कोरनागतान्वसिष्ठपुत्रानयं शापेन श्वभक्षकानकरोत् । ततः क्रतुभुजां वर्गेऽपि स्वर्गादनवतीर्णे ।

अयं महात्मा तपसः प्रभावादारोपयामास दिवं त्रिशङ्कुम् ।
नीलाम्बरं निह्नुतराजवेषं वर्षानिशीथादविशेषवेषम् ॥ ९६ ॥ ततः
अपातयत्स्वर्गमुपाश्रयन्तं संजातमन्युः शतमन्युरेनम् ।
ततोऽवलम्ब्यास्य नियोगशङ्कुं लेभे त्रिशङ्कुर्गगने प्रतिष्ठाम् ॥ ९७ ॥

ततो गीर्वाणगणप्रार्थनया परित्यक्तभुवनान्तरनिर्माणकर्माणं तत्र तपःप्रत्यूहः प्रत्युद्भूत इति पश्चिमायां दिशि पुष्करे पुष्कलं तपश्चरन्तमम्बरीषयज्ञपशुविनाशप्रायश्चित्तार्थं बह्वीभिर्गोभिः क्रीत्वा नरपशुतां नीयमानस्तावदृचीकस्य मध्यमपुत्रः शुनःशेपः शरणमयाचत । अयं भगवान्निजतनयविनिमयेन रक्षितुमेनमुन्मुखः पराङ्मुखेभ्यस्तेभ्यो हविष्यन्दादिभ्यः शापेन वसिष्ठपुत्रदशां दत्त्वा गाथाद्वयप्रीताभ्यामिन्द्रोपेन्द्राभ्याम म्बरीषं शुनःशेपं च परिपूर्णमनोरथौ कारयामास । ततस्तपस्यन्तमेनं मेनकासङ्गतस्तपोभङ्गश्चिरमङ्गीचकार । पश्चात्पश्चात्तापाभिभूतोऽयमुत्तरे भूभृति कौशिकीतीरे घोरं तपश्चचार । तत्र जम्भारिप्रहितां रम्भां शैली

भवेति शङ्कया पूर्वस्यां दिशि निरस्तनिश्वासं तपश्चरत्यमुष्मिन्नुष्मणा तपोभेरुद्विग्नितामरसखस्तामरसासनः सन्निधाय जितेन्द्रियत्वाद्ब्रह्मर्षिरसि, वसिष्ठोऽप्येवं व्याहरतु भवन्तमित्यभाषत ।

असौ वसिष्ठनिर्देशाद्ब्रह्मर्षित्वमविन्दत ।
यथोपनयसंस्काराद्द्विजन्मा ब्रह्मवर्चसम् ॥ ९८ ॥

इति जनकपुरोधःश्लाघितो गाधिसूनुः
सह नृपतनयाभ्यां शर्वरीं तत्र नीत्वा ।
विधिवददिशदर्घ्यं पुष्पदर्भाग्रगर्भं
सरसिजदयिताय ज्योतिषे छान्दसाय ॥ ९९ ॥

तदनु जनकराजधानीं रामलक्ष्मणनिरीक्षणकौतुकादनवरतपतितेन विकचकुवलयनिचयोपचीयमानमेचकमरीचिमलिम्लुचेन पौरनारीलोचनरोचिषा कवचितनरपतिपथां विश्वामित्रः प्रविश्य दशरथतनयाविदमभाषत । अस्यां खलु नगर्यामारब्धयज्ञस्य राज्ञो जनकस्य भागधेयात्सीतानामधेयभाजनमजीजनत्कन्यारत्नं रत्नगर्भा भगवती । अस्याः पुनः किमपरं माहात्म्यम् ।

यतः, देव्या यस्या वसनमुदधिः पीठिका हाटकाद्रिः
हारः सिन्धुः सगरतनयस्वर्गमार्गैकबन्धुः ।
क्रीडाशैलः प्रथमपुरुषक्रोडदंष्ट्रा च तस्याः
सीतामातुर्जगति मिथिलां सूतिकागेहमाहुः ॥ १०० ॥

तत्र सीताविवाहार्थममरैरपि दुष्करम् ।
जनकः कल्पयामास धनुरारोपणं पणम् ॥ १०१ ॥

ततो महर्षिर्जनकस्य राज्ञः सभां सुधर्मासदृशीं प्रपेदे ।
तौ चापतुश्चापविलोकलोलौ सचापकौ कोसलराजपुत्रौ ॥१०२॥

तत्र विधिवदभ्यर्चितः कथितदशरथतनयवृत्तान्तः कौशिकः कौशिकप्रमुखैरमरैरस्मत्कुलमहत्तरे देवराते निक्षिप्तं विशेषतः सीताशुल्कार्थं मया

रक्षितमिदमिति जनकेन प्रदर्शितस्य चापस्यारोपणाय राममादिदेश ।

ततः

रामे बाहुबलं विवृण्वति धनुर्वंशे गुणारोपणं ।
मा भूत्केवलमात्मना तिलकिते वंशेऽपि वैकर्तने ।
आकृष्टं नितरां तदेव न परं सीतामनोऽपि द्रुतं
भङ्गस्तस्य न केवलं क्षितिभुजां दोःस्तम्भदम्भस्य च ॥ १०३ ॥

रामाकर्षणभग्नकार्मुकभुवा ध्वानेन रोदोरुधा
दृप्तक्षत्रयशःसितच्छदकुले जीमूतनादायितम् ।
वीरश्रीप्रथमप्रवेशसमये पुण्याहघोषायितं
सीतायाः किल मानसे परिणये माङ्गल्यतूर्यायितम् ॥१०४॥

नवः कठिनकर्षणत्रुटितचापजन्मा क्षणात्
दिशां द्विरदघींकृतः कृतहरित्पतिस्वागतः ।
जगद्भ्रमणकौतुकोच्चलितरामकीर्त्यङ्गना-
प्रयाणपटहध्वनिं प्रथयति स्म तारध्वनिः ॥ १०५ ॥

तत्र दशरथः सीतापरिणयकृतनिश्चयजनकप्रहितदूताहूतः पुरोहिताभ्युपगमान्मिथिलामुपागमत् ।

यत्कीर्तिस्तिलकायते सुरवधूसंगीतगोष्ठीमुखे
येनाद्यः पितृमान्पुमान्वसुमती येनैव राजन्वती ।
इन्द्रः संगरसंकटेषु विजहौ वीरस्य यस्योन्मुख-
प्रेङ्खत्स्यन्दनकेतनाम्बरदशासंदर्शनाद्दुर्दशाम् ॥ १०६ ॥

जनकः स्वकनीयांसमाजुहाव कुशध्वजम् ।
हत्वा युधि सुधन्वानं सांकाश्ये स्थापितं पुरे ॥ १०७ ॥

तदनु ताभ्यामभ्यर्चितः सपुरोहितो दशरथस्तत्र पुत्राणां गोदानमङ्गलं निर्वर्तयामास ।

जग्राह जनकात्सीतां तातादेशेन राघवः ।
आम्नायशासनेनार्चां यजमानादिवानलः ॥ १०८ ॥

आश्चर्यमेतत् ।

गुणमनिमिषचापे कंचिदारोप्य सीतां
कुशिकतनयवाक्यादग्रहीद्रामभद्रः ।
तदनु तदनुजन्मा मैथिलेन्द्रस्य चित्त
निहितबहुगुणः सन्नूर्मिलां लक्ष्मणोऽपि ॥ १०९ ॥

ततो भरतशत्रुघ्नौ कुशध्वजनियोगतः ।
माण्डवीश्रुतकीर्तिभ्यामभूतां गृहमेधिनौ ॥ ११० ॥

अथ दशरथः तनयैः सह कृतविवाहैर्विदेहेभ्यः प्रतिनिवर्तमानः संवर्तसमयमुज्जृम्भितहुतवहदुःसहरोषं भीषणदुर्वारपराक्रमं क्षत्रवर्गगर्वसर्वंकषपरश्वधधाराधीनरुधिरधाराकल्पितपितृतर्पणं दर्पवतामग्रेसरमुग्रप्रतापिनं तपःसमुचितवल्कलवसानमपि वासनावशादनतिपरिमुषितयुद्धश्रद्धं मध्येमार्गं भार्गवं मुनिं राममद्राक्षीत् । अप्राक्षीच्च तन्निरीक्षणादेव प्रक्षीणहर्षोऽपि महर्षिभिः सह विधाय सपर्यामार्यशील, कुशलमिति ।

अथ दशरथवाणीं तामशृण्वन्प्रसन्नां
भृगुपतिरिदमूचे प्रश्रितं रामभद्रम् ।
अवजिगमिषुरासं जीर्णचापात्तकीर्तेः
अविदितपरशोस्ते दोर्मदं कार्मुकेऽस्मिन् ॥ १११ ॥

आदाय तत्सगुणमाशु विधाय तत्र
संधाय बाणमवधार्य तपोधनत्वम् ।
तज्जीवितस्य दयमानमना मनीषी
संभूतघोरसमराद्विरराम रामः ॥ ११२ ॥

तावुभौ च भृगुवंशसंभवौ चापदण्डजमदग्निसंभवौ ।
प्रह्वभावमवलम्ब्य केवलं राघवार्पितगुणौ बभूवतुः ॥ ११३ ॥

युगपत्प्राप्तगुणयोश्चापभार्गवरामयोः ।
ऋजुता वक्रतां प्राप वक्रतापि तथार्जवम् ॥ ११४ ॥

ततस्तत्क्षणममोघेन राघवः शरेण भार्गवस्य स्वर्गतिं रुरोध । स्थाने हि तत् ।

नूनं जनेन पुरुषे महति प्रयुक्तम्
आगः परं तदनुरूपफलं प्रसूते ।
कृत्वा रघूद्वहगतेः क्षणमन्तरायं
यद्भार्गवः परगतेर्विहतिं प्रपेदे ॥ ११५ ॥

अथ संक्रान्तया जामदग्न्यशक्तिसंपदा संपन्नं पन्नगपरिवृढभोगभुजाभिरामं राममविरलमालिङ्ग्य मूर्ध्न्युपाघ्राय दशरथः परिखयेव परिसरे परिसरन्त्या सरयूसरितानुविद्धामयोध्यां दारकान्सदारान्सादरमवलोकयन्तीनां पौरपुरंध्रीणां नीरन्ध्रितगवाक्षैः कटाक्षैः सौन्दर्यवञ्चिततापिञ्छैः पिञ्छातपत्रायमाणधवलातपत्रः प्रविवेश ।

लज्जावशादविशदस्मरविक्रियाभिः
ताभिर्वधूभिरतिवेलमवाप्तसौख्यान् ।
इक्ष्वाकुनाथतनयान्प्रथमो रसानां
तारुण्ययोगचतुरश्चतुरः सिषेवे ॥ ११६ ॥

विद्ययेव त्रयीदृष्टया दर्भपत्राग्रधीः सुधीः ।
राजपुत्र्या तया रामः प्रपेदे प्रीतिमुत्तमाम् ॥ ११७ ॥

इति श्रीविदर्भराजविरचिते
चम्पूरामायणे बालकाण्डं समाप्तम्

—*—

Price List *May 1954*

SAMSKRITA SAHITYA SADANA

386, Chaluvamba Agrahar, Mysore.

Sanskrit works with English Translation, Notes etc.

DRAMA

	Rs	As
PRATIJÑĀ-YAUGANDHARĀYAṆAM of Bhāsa ...	2	0
SVAPNAVĀSAVADATTAM of Bhāsa ...	2	8
PRATIMĀNĀṬAKAM of Bhāsa ...	3	6
ABHISHEKANĀTAKAM of Bhāsa ...out of stock		
PANCHARĀTRAṀ of Bhāsa ...out of stock		
MĀLAVIKĀGNIMITRAM of Kāḷidāsa ...	2	0
ABHIJÑĀNA S'ĀKUNTALAM of Kāḷidāsa	2	8
NĀGĀNANDAM of S'rī Harṣa ...	2	12
RATNĀVALĪ of S'rī Harṣa ...	3	4
MUDRĀRĀKṢASAM of Vis'ākhadatta ...	4	4
RATNĀVALĪ : Kannada Trans, with Notes...	1	8

CHAMPU

	Rs	As
NĪLAKANṬHA VIJAYA, Chapter III ...	1	8
CHAMPU RĀMĀYAṆAM (Bāla Kāṇḍa) ...	1	0
Selections in Sanskrit Prose and Verse ...	1	8

PROSE

	Rs	As
KĀDAMBARĪ: PŪRVABHĀGA (Part I) of Bāṇa	2	8
KĀDAMBARĪ: do (Part II)	3	0
KĀDAMBARĪ: do (Part IV)	2	8
KĀDAMBARĪ: (Part V) MAHĀS'VETĀ-VṚTTĀNTA	4	0
KĀDAMBARĪ: (Part VI) KĀDAMBARĪ-VṚTTĀNTA	3	0

POETRY

	Rs	As
KUMĀRASAṀBHAVAM Cantos I, & of Kāḷidāsa	2	0
do Canto V	1	4
do Canto VI	1	0
RAGHUVAṀS'AṀ Canto XIV of Kāḷidāsa	1	8
do Canto XIII with Eng & Kan. Trans, Notes	1	4
KUMĀRASAMBHAVA Canto III with Kan & Eng Trans	0	12
BUDDHACHARITA I with Eng. & Kan. Trans. Notes	1	4
do III with Kan. & Eng. Trans. Notes	1	4